श्रीसरस्वती शरणम् ।

अष्टमे वर्षे] ज्येष्ठस्य पूर्णिमा सं० १९९०, [द्वादश-संख्या

अखिल भारत वर्षीय

संस्कृत विश्व विद्यालयः

तस्य मुखपत्रम्

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा म्लापयन् ।
विद्वल्लोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्
संजातः सुमनोमनो मधुरयन् सर्वत्र "सूर्योदयः" ॥

सम्पादकः—

श्रीमान् अन्नदाचरणशर्मा तर्कचूडामणिः

[महामहाध्यापकः, महामहोपाध्यायः]

—०:*:०—

उद्गम-स्थानम्—

श्रीभारतधर्ममहामण्डलम्, (जगत्गंज) काशी ।

वार्षिकं मूल्यं मुद्रात्रयम् ।

संरक्षकेभ्यः ५) असमर्थेभ्यःछात्रेभ्यः १)

विश्वविद्यालयसदस्येभ्यः २) पुस्तकालयेभ्यश्च १)

नियमाः सूचना च

(१) सूर्योदयः प्रतिपौर्णिमं प्रकाशितो भवति । ये पञ्चरूप्यकात्मकं ५) साहाय्यं करिष्यन्ति ते संरक्षका भवितुमर्हन्ति । संस्कृत-विश्वविद्यालय-सदस्येभ्यो मूल्यमस्य रूप्यकत्रयं ३) वार्षिकम् । असमर्थेभ्यो विद्यार्थिभ्यः पुस्तकाद्ध्येभ्यश्च १) रूप्यकेणैकेनेदं पत्रं प्रदीयते ।

(२) ग्राहकेभ्यो विश्वविद्यालयसदस्येभ्यः तथा विज्ञापनसंग्रहाच्च यो हि धनागमो भविष्यति स च संस्कृतविश्वविद्यालयस्य "छात्रवृत्तिकोषे" स्थास्यति ।

(३) ग्राहकैः प्राचीनैः स्वीया ग्राहकसंख्या, नवीनैश्च नवीनोऽहम्' इति नूनं लेख्यम् । अन्यथा पत्रप्रेषणे तथाऽन्यव्यवस्थाविधाने च महान् विलम्ब भवेत् । येषां समीपे समुचितसमये सूर्योदयो न गच्छेत्, तैः पत्रालये [पोस्ट आफिस] अन्वेषणानन्तरं शीघ्रं सूचना देया । धनादेश-(मनीआर्डर) द्वारा स्वपूर्णसंकेतं सुस्पष्टं विलिख्य सूर्योदय-मूल्यं प्रेषणीयम् । अत्र विज्ञापनदानेन महीयसो लाभस्य सम्भावना । विज्ञापननियमाः पत्रं प्रेष्य ज्ञेयाः । सूर्योदये मुद्रापणीयानि निबन्धादीनि तत्सम्बन्धीयपत्राणि, कार्यालय-व्यवस्थाविषयकदलानि च "श्रीमदयोध्याप्रसादद्विवेदी व्यवस्थापक-सूर्योदय कार्यालय जगत्गंज, बनारसकैंट," इति संकेतेन प्रेषणीयानि ।

कुरुक्षेत्रभूषण पं० छज्जूरामशास्त्रि कविरत्न-विद्यासागरकृतसंस्कृतपुस्तकानि ।
न्यायसिद्धान्तमुक्तावली-मूलचन्द्रिकानामकपरीक्षोपयोगिटीकासहिता, मू० १॥)
साहित्यविन्दुः—साहित्यशास्त्रे प्रवेशाय प्रथमं पुस्तकम्, मू० ॥)
न्यायदर्शनम्—परीक्षोपयोगि-वृत्तिसहितम्, मू० ॥)
दुर्गाभ्युदयनाटकम्-पं० नेकीराम-पण्डितरामकृष्णभट्टकृतटीकासहितमद्भुतम्, ॥)
प्राप्तिस्थानम्—पं० जगन्नाथ-लक्ष्मीनारायण-पुस्तकवाले बड़ादरीबा, देहली ।

समालोचना ।

वामननामकौमुदी ।

अत्र भगवदभिधानवामनपदस्य द्विचत्वारिंशदधिकशतार्थाः प्रकाशिताः सन्ति । एषा नेपालदेशीयेन काशीनिवासिना अर्ज्यालोपाह्वश्रीमदुमानाथविदुषा विरचिता । नेपालाभिजनपण्डितश्रीविष्णुप्रसादशर्मणा संशोधिता वैदुष्यविलसिता विबुधैर्विलोकनीया पुस्तिका काश्यां विद्याविलासनाम्नि यन्त्रालये मुद्रिता. विना मूल्यं लभ्यते । प्राप्तिस्थानम्—पं० उमानाथ शर्मा, श्रीकाशीराजपुरोहितगृहम्, मु० दुग्धविनायक, काशी ।

सूर्योदयः ।

अष्टमे वर्षे } ज्येष्ठस्य पूर्णिमा सं० १९९० । { द्वादशसंख्या

सम्पादकीया अभिप्रायाः ।

—:०❀०:—

प्रचारस्य नितान्तं प्रयोजनं प्रतिभाति ।

सम्प्रति भारतसर्वस्वस्य सनातनधर्मस्य प्रचारो नितान्तमपेक्ष्यते । प्रचारं विनैव सर्वथा विज्ञानानुमोदितादपि सनातनधर्मसिद्धान्ताज्जनता विमुखीबोभवीति । प्रचारमन्तरेण सनातनधर्मस्य गूढानि रहस्यानि नैव सर्वे जना अवगन्तुं प्रभवेयुः । प्रचारपथमपहाय नान्यः कोऽपि सुगमो मार्गः सनातनधर्मस्य सार्वभौमेन नैसर्गिकेण सकललोककल्याणसाधकेन विज्ञानेन प्राणिमात्रमुपकर्त्तुम् । पुराऽपि त्रिकालदर्शिनो महर्षयो ग्रन्थप्रणयनप्रकर्षेण महता प्रयासेन सनातनधर्मं प्रचारितवन्तः ।

× × × × ×

इदानीं विकराले कलिकालेऽपि केवलं पद्भ्यामेव ग्रामं ग्रामं सर्वत्र भूमण्डले बौद्धभिक्षवः सनातनधर्मस्यैकाङ्गीभूतमहिंसाप्रधानं बौद्धमतं प्रचारितवन्तः, अत्रापि प्रचार एव प्रभवति । प्रचारप्रभावपारवश्यादेव कुमारिलभट्टो जगत्यां बौद्धमतं स्वल्पशेषमकरोत् । खिष्टीयमहम्मदीयप्रमुखानि मतमतान्तराण्यपि प्रचारेणैव पृथिव्यां प्रसारितानि । अन्यान्यपि स्वल्पकालप्रभवाणि मतानि प्रचारप्राचुर्य्यादेव जगत्यां स्वीयप्रभावं वितन्वन्ति स्म । किन्तु महान् खेदो यदस्यां भारतभूमौ येषां सनातनधर्मावलम्बिनां सङ्ख्या सर्वतोऽधिकायते, येषां विद्यावैभवमपि सर्वतोऽतिशेते, येषु नैके धनकुबेरा वैश्याः प्रचण्डप्रतापशालिनो नृपेन्द्राः क्षत्रिया वर्त्तन्ते, अगणितास्तपस्विनो ब्राह्मणा विद्यन्ते, अधुनाऽपि यत्रास्तिकत्वमधिकं विजृम्भते, परलोकविश्वासोऽपि येषां परेभ्यः परतरं प्रतिभाति । किं बहुना येषां प्रतिनिधिभूता श्रीभारतधर्ममहामण्डलाभिधाना विराट् संस्था जागर्त्ति । अहो ! सर्वविभवैः सकलयोग्यतानिवहैर्नितरां विराजमाना अपि सनातनधर्मावलम्बिनः प्रतिपदं प्रतिक्षणं प्रतिपक्षिभिः परिभूयन्ते ।

नैतान् राजनीतिके सामाजिके समवाये धार्मिके वा कार्ये केऽपि गणयन्ति, कस्याञ्चिद् राजकीयसभायामथवा सम्मानयन्ति । सर्वत्रैवैते केवलां परिहासपदवीं प्रतिपद्यन्ते । अत्र कारणम् "धर्मो रक्षति रक्षितः" इतिसिद्धान्तानुयोगाद् येषां धर्मो रक्षितो भवति, त एव सर्वत्र सम्मानार्हा भवन्ति, अन्यथाऽरक्षितधर्माणां मानवानां मस्तके त्वपमानमेवापतति, इति । ततो यावत् सनातनधर्मरक्षाकार्थं न सम्पत्स्यते तावत् सनातनधर्मं मन्यमानाया जनताया लोके परलोके वा सम्मानं न समेधिष्यते । सनातनधर्मस्य रक्षणं प्रचारं विना न सेत्स्यति । तस्माज्जोघुष्यतेऽस्माभिः साम्प्रतं प्रचारस्य नितान्तं प्रयोजनं प्रतिभाति ।

× × × × ×

श्रीभारतधर्ममहामण्डलेन सनातनधर्मप्रचारार्थमेका प्रयोजनीया प्रणाली निर्द्धारिता । सा 'धर्मसेवाप्रणाली' नाम्ना पुस्तकरूपेणाऽपि प्रकाशिताऽऽस्ते, एषा श्रीमहामण्डलप्रधानकार्यालयात् काशीतो विना मूल्यं लभ्यते च । तत्र कार्यसौकर्याय विविधानि साधनानि सन्निवेशितानि सन्ति । तां पुस्तिकामादाय तत्र विन्यस्तां पद्धतिं पुरस्कृत्य ग्रीष्मावकाशेऽन्यस्मिन् वाऽवकाशे छात्रवर्गैरध्यापकवृन्दैः पुरोहितैः पौराणिकैः सर्वैरेव विज्ञतमैर्ब्राह्मणैरन्यैर्वा द्विजैः भारतसर्वस्वस्य सनातनधर्मस्य गौरवं जगद्गुरोरार्यजातेर्मर्यादाश्चाभिरक्षितुं सहयोक्तव्यम्, सर्वाणि च सांसारिककार्याण्युत्सृज्य नितान्तमावश्यके धर्मप्रचारकार्ये प्राणपणैः प्रयतितव्यम् । नातःपरतरं श्रेयस्करं किमपि कार्यमिदानीं विद्यते ।

सुरभारतीसेवकानां प्रमोदावसरः ।

सम्राज्ञा जन्मदिवसे त्रिचनापलीस्थ-सेंट जोसेफ महाविद्यालय (कालेज) मुख्यसंस्कृताध्यापकाय पं० टी० वी० श्रीनिवासाचार्याय तथा कलिकातास्थसंस्कृतमहाविद्यालयाध्यापकाय पण्डितकुञ्जविहारितर्कसिद्धान्ताय 'महामहोपाध्याय 'पदवी प्रदत्ता । तस्मादुभावपि विद्वांसावभिनन्दयन्तो नितान्तं प्रसीदामो वयम् । तदर्थं सम्राज्ञे साम्राज्याधिकारिवर्गाय च कोटिशो धन्यवादान् प्रयच्छन्तो योग्याय योग्यपदवीप्रदानात् प्रमोदामहे ।

× × × × ×

प्रसीदामो वयम् ।

परमश्रद्धेय-महामहोपाध्याय-पण्डितवर-श्रीगिरिधरशर्मचतुर्वेदमहोदयस्य व्याकरणाचार्यस्य प्रकाशकत्वे प्रकाशितम्, व्याकरणाचार्य-श्रीसूर्यनारा-

यणशर्मशास्त्रिणा साहित्याचार्य-भट्टश्रीमथुरानाथशास्त्रिणा च सम्पादितं जयपुराद्निःसृतं संस्कृतसाहित्यसम्मेलनस्य मासिकं मुखपत्रं पुनरभ्युदयाध्वानमारूढं संस्कृतरत्नाकरं सहयोगिनं समीक्ष्य परमानन्दसन्दोहैः परं पुलकिताः प्रसीदामो वयम् । यस्य सम्पादकौ प्रकाशकश्च विबुधधौरेयाः सुरभारतीमर्मज्ञाः संस्कृतसाहित्यसागरमथनमन्दरायमाणाः पण्डितप्रकाण्डा निरन्तरमुन्नतौ प्रयतमाना अवतिष्ठन्ते तस्याभ्युदये लेखसौष्ठवे विषयविवेचनायां वा कः संशयीत । अस्य पत्रस्यारम्भात् सङ्ख्यात्रयं साम्प्रतं मत्समक्षमुपस्थितमास्ते । तिसृष्वपि सङ्ख्यासु विविधा विबुधविलोकनीयाः सतां मुदमुद्वहन्तो गभीरगवेषणालभ्या लेखाः प्रकाशिता अभवन् । यान् विलोकयन्तो विश्वसिमो वयं यदचिरादेव सहयोगि पत्रमिदं स्वकीयं नामधेयमन्वर्थयिष्यति । किं बहुना, संस्कृतरत्नाकरोऽयं त्रयाणामाचार्यवर्याणां पाण्डित्यपूर्णां प्राञ्जलभाषोपनिबद्धां विज्ञानबहुलां विविधविषयविवेचनविहायसि समुदितां पूर्णां चान्द्रमसीं लेखमालामुपलभ्य नूनमुन्नतेरध्वानं क्षिप्रमुपैष्यति । वयं श्रीविश्वनाथानुग्रहान्निरन्तरमस्योन्नतिं चिरजीवित्वञ्च कामयामहे । वार्षिकमूल्यमस्य रूप्यकद्वयं नातिशेते ।

× × × × ×

विहारगौरवम् ।

सजलां सफलां शस्यश्यामलां विहारभूमिं विलोक्य कस्य मानसे प्रमोदातिरेको न जायते । प्राकृतिकसमस्तसौन्दर्यं भगवता विहारभूम्यै समर्पितम् । सर्वशस्यसम्पादिका विहारभूमिः कृषीवलानां प्रमोदाय कल्पते । यत्र गङ्गाशोणसङ्गमः सतां शान्तये जायते, यत्र तालद्रुमैः स्वपत्रव्यजनैर्निरन्तरं वीज्यते भूमिः । यत्र गङ्गा-सरयू-शोणभद्र-गण्डक-फल्गु-कोसी-पुनःपुनाप्रमुखानां नदनदीनां रामणीयकं दर्शं दर्शमध्वगानामन्तःकरणं हठादाकर्षति ।

+ + + + +

भगवान् भूतनाथो दशाननभक्तिपारवश्यात् कैलासशिखरात् प्रस्थितोऽपि विहारभूमेः सौन्दर्यसन्दोहं समीक्षमाणो विलक्षणवैभवविमोहितो नाग्रेसर्तुंकामो मन्ये वैद्यनाथधाम्नि वैद्यनाथो विराजते स्म । किञ्च, विद्याबुद्धिवैभवपराक्रमभाण्डारभास्वरा विहारभूमिः सर्वतो विजयतेतराम् । एकतो वङ्गकलिङ्गयोः सीमानं प्रतिष्ठापयति, द्वितीयतो गयादितीर्थसमूहं सन्धारयति ।

+ + + + +

विहारभूम्यामेव विश्वामित्रस्य सिद्धाश्रमे व्याघ्रसर (वक्सर) नगरे

श्रीरामलक्ष्मणाभ्यां विविधास्त्रविद्यापारंगतत्वमापेदे, विदेहजनकस्य यज्ञशालायाञ्च क्षात्रधर्मपरीक्षा प्रदत्ता तस्यामुत्तीर्णञ्च ।

यत्र जनकादयो जीवन्मुक्ता जरासन्धादयो वीरक्षत्रियाश्च जज्ञिरे। यत्रत्याः चाणक्यादयः कूटराजनीतिज्ञाः स्वबुद्धिवैलक्षण्येन सर्वं जगच्चकितवन्तः । यत्राहिंसाव्रतदीक्षितो भगवान् बुद्धदेवः स्वीयैः सार्वजनीनैरुपदेशैः सकलभूमण्डलमायत्तीकृतवान्, जैनमतप्रवर्तकाः स्वामिमहावीरादयस्तीर्थङ्करा यत्र प्रादुरभवन् । यत्रत्यस्य नालन्दाविश्वविद्यालयस्यादर्शसाम्यं नाद्यावधि केऽप्यर्वाचीना विश्वविद्यालया गन्तुमपारयन् ।

\+ + + + +

यत्र काव्यकलाकुशलस्य कविशिरोमणेः कालिदासस्य कविताकलापः प्रादुर्भवन् साम्प्रतमपि सर्वतो यशोराशिं वितनोति । यां विहारभूमिं शाकद्वीपीयब्राह्मणवंशावतंसो ज्यौतिषमार्त्तण्डो वाराहमिहिरो, वररुचिर्वैयाकरणः, कोशकारः अमरसिंहः, वैतालभट्टादयो विद्वांसः कपिलकणादगौतमादयश्च स्वजन्मभिरलङ्कृतवन्तः, तद्विद्यासाम्यं केऽन्ये प्रदेशाः प्राप्तुं पारयेयुः ।

× × × × ×

का कथा प्राचीनानामद्यत्वेऽपि यत्र स्वर्गीयरमेश्वरसिंहसमानः सनातनधर्मरक्षको नृपेन्द्रः, स्वर्गीयशशिनाथसमो वैयाकरणः, राघवपुरीयानन्तमिश्रसदृशो वेदान्तपारगः, बच्चाझातुल्यः पण्डितप्रकोण्डः, रामावतारपाण्डेयनिभो निखिलशास्त्रपारंगतः, राजेन्द्रसन्निभः शान्तनेता च प्रादुरभवन्, तस्याः सौभाग्यसन्दोहं वर्णयितुं कः प्रभवेत् ।

× × × × ×

यस्याः कुक्षेरनेके धर्मात्मनो महात्मानो, धर्मप्रवर्त्तकाः महातपस्विनो महाकवयः, महान्तो दिग्विजयिनः शासकाः, विख्यातपण्डिताः, सर्वतन्त्रस्वतन्त्रा विदुष्यो जन्मान्याददुः । यत्र बौद्धमतध्वंसकः कुमारिलभट्टोऽपि विद्याध्ययनार्थमागच्छत् । तदीयसौभाग्यसूर्यो न कदाचिदस्तमुपेष्यतीति सम्भाव्यते ।

\+ + + + +

तथापि सुरभारतीसेवकानामन्तरात्मनि महान् खेदो जायते यत्तस्यैव विहारप्रदेशस्य राजधान्यां पाटलिपुत्रे नैकोऽपि विराट् संस्कृतविश्वविद्यालयो विद्यते, येन विहारगौरवस्य रक्षणं सम्भवेत् । अतो विहारहितचिन्तकैर्महानुभावैर्नूनमत्र मनो निधेयमिति नम्रं निवेदनं नः ।

हा ! दुर्दिने शिवप्रकाशोऽप्यस्तं गतः।

अहो ! महदाश्चर्यम्, हा ! दुःसहं दुःखं लिखतामस्माकं लेखनी हठाद् हस्ताच्च्यवते, मस्तिष्कं घूर्णमानमास्ते, अस्मदीयमन्तःकरणं परितापपुञ्जस्य पराकाष्ठां पर्युपैति। हृदयमेजते मनो मनागपि शोकान्न विरमति। अवगत्यापि नश्वरं संसारं बुद्धिर्नैव पर्यवतिष्ठते। हा ! धिक् दैवम्, निष्करुणेन कालेन सनातनधर्मसर्वस्वं मथुरामणिर्भारतभूषणो ब्राह्मणवंशावतंसः सर्वतन्त्रस्वतन्त्रो ज्योतिर्विद्यापारंगत औदीच्यब्राह्मणकुलकमलदिवाकरो मथुरावास्तव्यो लक्ष्म्या सरस्वत्या च समं सेव्यमानो ज्योतिषीबावेत्युपनामकः शिवप्रकाशद्विवेदिमहोदयो गतज्येष्ठकृष्णनवम्यां गुरुवासरे निशीथे तूर्णं तुरीयपदमुदारहारचरणं स्मारं स्मारं नश्वरं संसारमुत्सृज्य ध्रुवं शिवलोकमुपागतः।

× × × × ×

एष महानुभाव आरम्भादेव श्रीभारतधर्ममहामण्डलव्यवस्थापकानां पुण्यश्लोकानां श्रीस्वामिचरणानामनन्यभक्त आसीत्, प्रारम्भादेव श्रीमहामण्डलस्य समुन्नतौ च साहाय्यं विदधानो निरन्तरं प्रयत्नमकार्षीत्। मथुरायां श्रीमहामण्डलस्य प्रधानकार्यालये स्थिते नैकवर्षाणि यावत् प्रधानाध्यक्ष- (जनरलसेक्रेटरी) पदमलङ्कृतवांश्च। अस्य विज्ञतमस्य लोकोत्तरमातिथ्यं सर्वैः समं मधुरं व्यवहारं साम्बसदाशिवचरणसरसीरुहेष्वहैतुकीं भक्तिश्चावलोक्य केषां चेतांसि न प्रसीदन्ति स्म। अयं पण्डितप्रकाण्ड ज्योतिर्विद्यायान्तु मार्त्तण्डतोऽप्यधिकतमप्रकाशोऽभूत्, ततोऽनेन ज्योतिर्विद्यामार्तण्ड इत्याद्युपाधयोऽलभ्यन्त। प्रेक्षावानयं निजप्रखरप्रतिभाप्रभावाद् भुवनज्ञानप्रदामेकां वेधशालां स्वयं निर्मितवान्, यां विलोक्य स्वदेशीया विदेशीयाः सर्वेऽपि विद्वांसो बुद्धिवैलक्षण्यमेतस्य प्रशंसितवन्तः। किं बहुना यथाऽस्य ज्योतिःशास्त्रे पाण्डित्यप्रकर्ष आसीत्, तथैवान्यान्यपि शास्त्राण्यनेन पूर्णमधिकृतानि। विद्यया सममेव सौजन्यमपि लोकोत्तरमस्मिन् विराजते स्म।

× × × × ×

यथैष महाभागो विविधविद्यावैभवैर्विभ्राजते स्म तथैव विपुलैर्धनागारैरपि विराजते स्म। मिथो मात्सर्य्यं विस्मृत्य परस्परं प्रीतिमुपगते इव लक्ष्मीसरस्वत्यौ भाग्यशालिनं विबुधं धनिनमेनं निषेवेते स्म। अतिथिस-

त्कारे यादृशी श्रद्धाऽस्मिन् महापुरुषे दृष्टा, तादृशी प्रायो नान्यत्राधुनादृग्गोचरतामपद्यते । देहावसानमस्य महनीयस्याकर्ण्य श्रीमहामण्डलस्य व्यवस्थापकाः सभासदाः कर्मचारिणः सर्वे समवेदनामनुभवन्तः शोकसन्तप्तमानसा वर्त्तन्ते ।

× × × × ×

एवंविधेन नररत्नेन विधुरां वसुन्धरां विलोक्य कस्य सहृदयस्य हृदये व्यथा न बोभूयते ? तत्रापि विषमे विषमये भीषणे देवासुरसङ्करे समुपस्थिते सनातनधर्ममभितो विविधविघ्नबाधाबाहुल्यमेघमण्डले घूर्णमाने सनातनधर्मस्य महारथेरस्यासंयोगान्तेन वियोगेन केषां सनातनधर्मावलम्बिनां चेतांसि न चेखिद्यन्ते । अपि तु विशेषतः सर्वा सनातनधर्मावलम्बिनी जनता सामान्यतो भारतीया प्रजा शोकाकुलीबोभवीति ।

× × × × ×

श्रीविश्वेश्वरचरणसरोरुहेषु नम्रं निवेदयामो वयं यदसौ कैलाशवासिनो विबुधवरेण्यस्य शिवप्रकाशद्विवेदिनः परलोकगतात्मने शान्तिं तत्परिवारबन्धुवर्गेभ्यश्च धैर्यं प्रयच्छतु । वयमस्य सज्जनशिरोमणेर्यथासम्भवमग्रिमाङ्के जीवनचरितसम्बन्धे किमपि वक्ष्यामः ।

× × × × ×

किमपि निवेदनम् ।

ले०—मिश्रोपाह्व-ब्रह्मशङ्करशर्मा साहित्यशास्त्री ।
(श्रीराधारमणमन्दिर, सिद्धमाताकी गली बुलानाला—बनारस सिटी ।)

सूर्योदयं स्वयमवेक्ष्य सुशिक्षिताँश्च,
नूनुवतौ सततमुद्यतमानसाँश्च ।
विद्यार्थिनोऽर्थिवदनर्थनिवारणाय,
चैतत्प्रकर्त्तुमयमर्थयते चिराय ॥

अयि !निजकुललोकलोचनानन्ददायिनः ! प्रतिक्षणविलक्षणविचक्षणगुणगणादायिनः ! कनीयांसोऽकनीयांसोऽपि सत्प्रकृतिका मधुरा अप्यसत्प्रकृतिकामधुरा विद्याऽर्जनोपायोपेयसङ्कलन्यकुलकरणाकुलाः सुकुला अनन्तेवासिनोऽप्यन्तेवासिनः ! ।

विद्राङ्कुर्वन्तु विद्रां कुर्वन्तु मध्यमध्यास्य सम्प्रति सम्प्रतिक्षणं क्षणं लिप्सुभिर्भवाहृशैरक्षुण्णं क्षुण्णं चास्मद्गुरुचरणैराचरणसञ्चरणं स्वाचरणशरणं भवन्तो भवं तोषयन्तोऽन्तःकरणेनाधिभवं तोषयन्तोऽन्तकरणे न भवस्थ ।

(अस्मद्गुरुचरणानामाचरणसञ्चरणम्)

यदाचरणीयमस्मद्गुरुचरणानां सारस्वतसेवनसामयिकमाचरण सञ्चरणं तत्त्वेतद्—

श्री १००८ श्रीमन्माध्वसम्प्रदायाचार्यदार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यतर्करत्नन्यायरत्नगोस्वामिश्रीदामोदरशास्त्रिचरणानां सविधे विधेरानुकूल्येन तदीयविनेयतामनुभवता भवतापमुन्मूलयता मया तदीयवदनारविन्दात् क्षरदक्षरमकरन्दबिन्दुसंमिश्रं पद्यमेकमेकदाऽऽत्मश्रुतिपुटकाभरणीकृतम्—

"नान्योद्योगवता न चाप्रवसता नात्मानमुत्कर्षता
नालस्योपहतेन नान्यमनसा नाचार्यविद्वेषिणा ।
लज्जाशीलविलाससुन्दरमुखीं सीमन्तिनीं नेच्छता
लोके ख्यातिकरः सतामभिमतो विद्यागुणः प्राप्यते ॥"

ततो यावानानन्दोदधिर्निर्मर्यादोऽभूद्, याचच्चान्तःकरणं तेन प्लावितं, तदसुवचमेव, तत्र प्रमाणन्तु बहिःकरणानामकारणमेव स्वस्वविषयेभ्यो बहिष्करणम् ।

ततः कियत्सु क्षणेष्वतिक्रान्तेषु विचारितमिदं—यद्यस्ति केषुचिदीदृशानां गुणानां सन्निपातः ? तर्हि-गुरुचरणेषु सर्वतो भावेन दृग्विषयीकृतः ।

अतोऽद्य तदीयमुखादन्यदीयमुखादपि श्रुतिगोचरीभूतं तज्जीवनोदन्तजातमवलम्ब्य सारस्वतसेवनसामयिकमाचरणं सङ्क्षेपेण वर्णनार्थमुपक्रम्यते—

गोस्वामिपादैर्लोके ख्यातिकरः विदुषामभिमतो विद्यागुणो यत् प्रापि, तत्त्वध्ययनं विना कार्यान्तरमनासक्तिधिया विदधतैव, अर्थादध्ययनसमयं प्रायेण प्रतिक्षणं तैरन्तःकरणैरधीतविषयपर्यालोचनां बहिःकरणैरेव व्यावहारिकं दैनन्दिनकृत्यं चाचरद्भिर्निखिलान्यहानि नीतानि ।

तथा च—यत्र सर्वदोमाधवो विराजते तद् वृन्दावनमानन्दवनञ्च विहाय नैयायिकानां नवद्वीपमिव नवद्वीपं द्वीपिप्रतिमोऽप्रतिमोल्लासविशिष्टो विशिष्टश्रमेणाश्रित्य षड् वर्षाणि यावत् यावदक्षपादशास्त्रमक्षपादकल्पादनल्पप्रतिभाभूषितात्मनस्तीर्थादधीतवांस्तत्रभवान् भवान्मुक्तियुक्तिविचक्षणो विलक्षणोऽस्मद्गुरुवरः, एतेन प्रवासं विना न केऽपि नाकेऽप्यात्मानं मनोरमं गिरामावासं विधातुं प्रभवो भविष्यन्तीति भूयो भूयो भवद्भिर्विभावनीयम् ।

एवं छात्राणामात्मोत्कर्षोऽपि छत्रायमाणो भवति विद्योत्कर्षविशिष्टवृष्टौ, इत्याकलय्यैव चास्मद्गुरुचरणा नृपतिमुकुटमणिमण्डितचरणा अपि समये

समये स्वकीयगुरुचरणानां लोकविस्मयकरेण स्वकरेणैव किङ्करेणेवोपानदादिधारणेन रोगाक्रान्तानाञ्च तेषामात्ममलापेतवरस्य मलोपेताम्बरस्य प्रक्षालनेनाखर्वं खमिव स्वं सौभाग्यगर्वं वहन्ति स्म ।

अपि चालस्यपांसुला आविलहृदा इव परमसारस्वतजीवनप्रसादमासादयितुमभीक्ष्णमधिक्षममक्षमा एव दृश्यन्तेऽन्तेवासिनः, अत्रापि तदीयमनालस्यं प्रशस्यमेव सम्प्रत्यपि प्रत्यहं तत्सांमुख्यभाजां विदां नाविदितम्,

यत्—सत्स्वपि बहुष्वनुचरवर्गेषु स्वयमशेषवर्ष्मकृत्यसम्पादनं विधाय नतानपि न तान् कृतकृत्यतामधिगन्तुं प्रभून् कुर्वन्ति मदीयगुरुपादाः; का कथा अध्ययनसमये, वर्त्तमानानां मानानां निधानां तेषां; तत्समये तु षोऽशवार्षिकावस्थात आरभ्य षोडश वर्षाणि यावद् दैनन्दिनशयनसमयो नक्तं पञ्चदण्डावच्छिन्नोऽविच्छिन्नोऽवर्तिष्ट ।

किञ्चान्यस्मिन् कस्मिंश्चित् कार्ये संसक्तमानसेन सहसाहसेनापि केनापि नापि क्वाप्यनवद्यविचारत्नं रत्नगर्भायामित्यस्य प्रसिद्धिः सर्वत्र सिद्धिमती ततस्तद्विषये विषवद्वचनं न कथञ्चन समीचीनमतोऽलं पल्लवितेन,

किन्त्वत्रापि निदर्शनकक्षामधिष्ठिता गोस्वामिपादा एव वहनीया मनसा शिरसाऽपि रसामधिश्रितैः—सौजन्यं श्रितैः धीमद्भिः, अपरञ्च—तन्मनस्कतयैव तैः कदा सहस्रभानुर्भानुरुदयमस्तमयञ्च यात इति न परिज्ञातं नापि परिश्रमपारुष्यञ्च ।

आचार्यविद्वेषिता तु गोस्वामिपादैरवहेलिताऽसतीव सती न कदाचिदपि तानवरुणद्धि स्म ।

अपरञ्च—मानुष्यकसुलभाया नूत्नरमणीरत्नप्रभाऽभिहतचक्षुष्कतायाः स्थास्नुता यदि न तेषूपलभ्येत, तर्हि भवद्भिरेतद्विषये प्रमादपि विस्मयनिवासभूमिभिर्न भवितव्यम्; यतो न काऽपि प्रमदा कामपि सौभाग्यमदमुद्वहन्तीं वचनामृतसरस्वतीं पदे पदे पदग्रहणपूर्वकं सेवमानं जनं सावमानमिव स्वीकरोति; किम्पुनः साक्षात् सरस्वतीं शाश्वतिकीमाधिदैविकीं शश्वत् साभिमानान् भजमानानेनान् गोस्वामिपादानिति ।

इत्येतदार्यचरितं त्वरितं समस्तं
व्यस्तञ्च ये यदि मुदैव सदाचरेयुः ।
त्रैलोक्यविश्रुतगुणोन्नतिमत्सु गण्या-
वाण्या विमण्डितहृदो भुवि ते भवेयुः ॥
इत्याशास्ते शास्ति यश्चाज्ञयेशान्
राधाऽधीशान्नित्यमेषोऽल्पधीमान् ।
गोस्वामीनं तीर्थमत्यर्थमर्चन्-
मिश्रोपाह्वो ब्रह्मयुक्शङ्करः सन् ॥

धिगर्थान् कष्टसंश्रयान् ।

—-०:#:०—-

निर्म्मायकः—श्रीदीनानाथशर्म्मा सारस्वतशास्त्री ।

('मुलतानस्थ'—स० ध० संस्कृतकालेजाध्यापकः)

किङ्कर्त्तव्यताविमर्शाऽनभिज्ञा प्रज्ञा; शुष्कं मस्तिष्कम्; घूर्णमानञ्च मानसम्; यद्—हा ! अस्मिन् विषमे विषमये समये किं क्रियेत* कथं वा स्थीयेत। जीवनस्य आवश्यकतापूरणाऽर्थमर्थस्य भवत्यपेक्षा। सोऽर्थ एव दरिद्रस्य प्राणाः, साधारणस्थितिकानामाश्रयः; धनिनाञ्चाऽऽश्वासयिता। तदभावे जीवन्नपि पुरुषो मृतकल्पः, सन्नपि असन्निव। तत् किं विधीयेत; इति प्रश्ने† 'अर्थोऽर्ज्यताम्' इत्युत्तरं निशम्यापि हृदयमेजति+। अहह !!! 'वचने का दरिद्रता'। 'अर्थोऽर्ज्यताम्' इत्यक्षरचतुष्कं मुखादनायासं निर्गच्छति; परं किं तदाचरणमपि तथा सौकर्य्यं वहति ? नहि, नहि, जात्वपि नहि।

"अर्थानामर्ज्जने दुःखम्"

इत्युक्तिः सर्व्वथा याथातथ्यं निषेवते। अर्थानामर्ज्जने दुःखं सर्व्वेषामेव। एतदर्थमेव विद्यालयाऽध्यापकानां मस्तिष्कं विकृतिमेति; आरोग्यं सार्व्वदिकाऽवकाशं ग्रहीतुं£ प्रार्थनापत्रं ददाति; दृष्टिस्त्यागपत्रं प्रदातुमुद्यता तिष्ठति; चिन्ता शरीरं जर्ज्जरयति×; महनीयमातापितृभ्यां= प्राणेभ्योऽपि% प्रणयिन्या

---

* क्रियेत। करोतेः कर्म्मणि लिङि सार्व्वधातुके यकि 'रिङ् शयग्' इति ऋकारस्य रिङ्। 'सूर्य्योदय' स्य १०३ पृ० १७ पं० पञ्चमसङ्ख्यायां मल्लेखे 'क्रियते' इति, १३७ पृष्ठे पं० १० 'अक्रियन्त' इति शुद्धं मुद्रयित्वाऽपि मुद्रकैः ९९ पृष्ठेऽन्तिमपङ्क्तौ प्रमादतो 'दूरीक्रियेरन्' इति मुद्रितम्, तत्र 'दूरीक्रियेरन्' इति शुद्धपाठो ज्ञेयः पाठकैः।

† प्रश्नः। पृच्छतेः 'यजयाचयतविच्छप्रच्छ' इति नङि 'च्छ्वोः शूडनु' इति च्छस्य शत्वे 'शात्' इति श्चुत्वनिषेधे, 'प्रश्ने चासन्न' इति ज्ञापकाद् ङित्त्वप्रयुक्तसम्प्रसारणपरिहारे रूपम्। + एजति। कम्पते। कम्पनार्थः परस्मैपदी। दीप्त्यर्थस्य तु तङ् भवति।

£ ग्रहीतुम्। 'ग्रहोऽलिटि' तीरो दीर्घः। तुमुनः क्ङित्त्वाऽभावान्न सम्प्रसारणप्राप्तिः।

× जर्जरयति। शरीरं जर्ज्जरं करोति। 'तत्करोती' ति णिच्, इष्ठवद्भावश्च। तेन टिलोपः। मुद्रका इष्ठवद्भावस्थानेऽज्ञानाद् इष्टवद्भावं मुद्रयन्ति।

= मातापितृभ्याम्। 'आनङ्ऋत' इति पूर्वपदस्य आनङ्। मातुः पूर्वनिपातश्च 'पितुर्दशगुणा माता गौरवेणाऽतिरिच्यते' इति स्मरणात् पित्रपेक्षयाऽभ्यर्हितत्वात्।

% प्राणेभ्योऽपि—। 'पञ्चमी विभक्ते' इति पञ्चमी। अथवा ल्यब्लोपे पञ्चमी। प्राणानपेक्ष्येत्यर्थः।

२

स्वपत्न्या, आश्रयदातृणा+ स्वनगरेण च स्थितपूर्व्वः‡ स्नेहो रूक्षतारूपे परिणमति† । अर्थाऽर्थमेव कृषका भीष्मे ग्रीष्मे घर्मं, हेमन्ते च हैमनं पवनं निषेवमाणास्तपस्वितामनायासं प्रपद्यन्ते । तस्मै वसुने एव मनुष्या अनादृत्या* भृत्या भूत्वा उन्नतिमाप्तुं प्रणमन्तो जीवनमासादयितुं प्राणानर्पयन्तः, सुखं लब्धं दुःखीयन्तोऽकाण्डे घोरप्रचारे कान्तारेऽपि पादचारं कुर्व्वन्तोऽसङ्ख्येषु सङ्ख्येषु अनरिघ्नतातीनामरातीनाञ्च हेति (शस्त्र) हतिततिभिः प्रहतास्सन्तः, बन्धूनां वधे बन्धे वा बाध्या भवन्तोऽन्तरजस्रमस्रबिन्दुसहस्रं प्रवाहयन्तोऽपि बाह्ये स्मेरा इव भवन्ति ।

अस्मै धनायैव वाजिवाहका रात्रिन्दिवं यानम् एव स्वाऽस्थानस्थानं निर्म्माय तत्रैव तिष्ठन्ति; भुञ्जते, विश्राम्यन्ति, स्वपन्ति, गायन्ति, प्रणयिनीभिर्मनसा सङ्गच्छन्ते, अश्वान् कर्क्कशाभि—कशाभिराघ्नन्ति= स्वेदस्नातानपि न विश्रमयन्ति# । अमुष्मै वित्तायैव भिक्षुका आत्मगौरवं सौशील्यं सदाचरणं शान्तिञ्च दीनताऽनले जुहवतः$ सन्तो दैन्यं चाटुकारितां मौर्ख्यम् अशान्ति चिन्तासन्तानवितानैकतानताञ्च फले प्राप्नुवन्ति । एतस्मै द्रव्यायैव चौरा मनुष्या अपि रात्रिचराः, मानवा अपि दानवाः, ऋजवोऽपि %अनार्ज्जवप्रणयिनः, दुर्दान्तं कृतान्तमपि प्रत्यादेष्टुमिव स्वहस्तनिहितमृत्यवः,

---

+ आश्रयदातृणा नगरेण । 'तृतीयादिषु' इति पुंवद्भावाऽभावपक्षे नुम् ।

‡ स्थितपूर्व्वः । पूर्वं स्थितः । 'सुप्सुपे' ति केवलसमासः । 'भूतपूर्वे चरड्'—ति निर्देशात् क्तस्य पूर्व्वनिपातः ।

† परिणमति । अन्तर्भावितण्यर्थान्नमतेः 'स स्नेहं परिणमती' त्यत्र सौकर्य्यातिशयं द्योतयितुं कर्तृव्यापाराऽनपेक्षायां कर्म्मण एव कर्तृत्वात् कर्त्तरि लट् । परिणमनक्रियाकर्त्रैव वैलक्षण्यदर्शनेन कर्मस्थक्रियत्वाऽभावान्न कर्म्मवत्त्वम् ।

* अनादृत्याः । 'एतिस्तुशास् वृ दृ' इति क्यप् 'ह्रस्वस्य पिती' ति तुक् ।

= आघ्नन्ति । अकर्मकत्वस्वाङ्गकर्म्मत्वाऽभावाद् 'आङो यमहन' इति तङ् न । 'गमहने' त्युपधालोपे 'हो हन्ते' रिति कुत्वम् ।

विश्रमयन्ति । अमन्तत्वप्रयुक्तमित्त्वाद् ह्रस्वः । 'विश्रामयन्ती' ति तु 'मितां ह्रस्व' इत्यत्र 'वा चित्तविरागे' इत्यतो 'वा' इत्यस्याऽनुवर्त्तनाद्व्यवस्थितविभाषाश्रयणान्न ह्रस्वभाक् ।

$ जुहवतः । 'उभे अभ्यस्तम्' इत्यभ्यस्तत्वाद् 'नाभ्यस्ताच्छतु' रिति नुम्निषेधः ।

% अनार्ज्जवेति । ऋजोर्भाव आर्ज्जवम् । 'इगन्ताच्च लघुपूर्वाद्' इति अण् पूर्वाचो वृद्धिः; ततो नञ्समासः ।

पाणिनीया इव सन्धिच्छेदतत्परा भवन्ति। किं बहुना—तस्मै विभवायैव सर्व्वं समयनाशमपि न गणयन्ति, पुण्यनाशमपि न बुद्ध्यन्ते; समीपस्थं मृत्युमपि न गणयन्ति। यद्येवं तत् को व्यपदेष्टुमीष्टे; यद्—अर्थानामर्ज्जने दुःखं नास्ति। परं समस्तमेव सत्त्वजातम् अन्ततो धनं प्राप्य—

'क्लेशः फलेन हि पुनर्नवतां विधत्ते'

इत्युक्त्या पुनर्नवं भवति; मृतमपि पुनर्ज्जीवति। क्लिष्टा अपि ते प्राणिनः पुनरात्मनः सुखिनो मन्यन्ते। परं धनेऽर्ज्जितेऽपि न सुखस्य पूर्णं-साम्राज्यम्। यतः—

"अर्ज्जितानाञ्च रक्षणे"

दुःखमित्यनुषङ्गः। अर्ज्जितं धनं कुत्र स्थाप्येत; इत्यत्र किङ्कर्त्तव्यविक्षुब्धा भवति मतिः। यदि गृहे स्थाप्येत, तर्हि तस्य वृद्धिर्न जायते। भुक्तं सत् तत् सत्वरमेव नश्येद्=इति आशङ्का तिष्ठति, इतश्च तस्करादीनां महती चिन्ता विना मूल्यं क्रीयते × "रूपकाणां झणत्कारं निशम्य चोरा आगत्य तद् बलात्कारेण न लुण्ठयुः, अपि वा तदर्थमस्मद्वधं न कुर्व्वीरन्, इति चिन्ता सततं वरीवृद्ध्यते + यदि रूप्यकप्रतिनिधिराजकीयपत्राणि (नोट) स्थाप्येरन्; तदा उपजिह्विकाजिह्वाभ्यः, सर्व्वदूषकेभ्यो मूषिकेभ्यो वह्नेर्जलाच्च भयं भवति। कदाचित्तमसि करञ्जविदारणसमयेऽपि तस्य विनाश आशङ्क्यते। राज्यनाशशङ्काऽपि प्रतिपदमुदेति; यद्—वर्त्तमानशासनपरिवृत्तौ राजतराजमुद्राणां पुनरपि किञ्चिन्मूल्यं प्राप्स्यत एव; परं राजान्तरं ※ पूर्व्वराजकीयपत्रा-

= तद् नश्येद्। नश्यतेः कर्त्तरि रूपम्। अस्याऽकर्म्मकत्वात् कर्मवाच्यता न भवति किन्तु भाववाच्यतैव। तत्र-'तेन नश्येत' इति भवति। मम 'समाचारपत्राणां लाभ' इति अष्टमवर्षस्य द्वितीयसंख्यायां मुद्रिते लेखे मुद्रकाणामेव कृपया 'सर्पोऽपि म्रियेत; लगुडोऽपि न नश्येत' इत्यशुद्धं मुद्रितम्। कर्त्तृवाच्यत्वादत्र 'सर्पोऽपि म्रियेत, लगुडोऽपि न नश्येत्' इति पाठ एवाऽऽसीन्मामकीनः। 'म्रियेत' इत्यत्र तु तङ्, 'म्रियतेर्लुङ्लिङोश्च' इति मित्त्वात्। 'नश्येत्' इत्यत्र तु परस्मैपदमेव।

× क्रीयते। क्रीणातेः कर्मणि लट्। + वरीवृध्यते इति यङि प्रयोगः। 'वरीवर्धते' इति तु यङि न शुद्धम्। यङ्लुक्यपि न शुद्धम्। अनुबन्धकार्य्यस्य यङ्लुक्यसत्त्वेन अनुदात्तेत्त्वप्रयुक्तात्मनेपदनिषेधात्; 'चर्करीतञ्च' इत्यस्याऽदादिषु पाठाच्छपो लुकः पाक्षिकस्य ईटश्च दुर्वारत्वात्। तत्र 'वरीवृधीति, वरीवर्द्धि' इत्यादयः प्रयोगा भवन्ति रुग्रिगरीगिविशिष्टाः।

※ राजान्तरम्, । अन्यो राजा। 'मयूरव्यंसकादि' त्वात् समासः।

णामपि पूर्णं मूल्यं वितरीष्यति नो वेति को वेत्ति, कदाचिन्नाऽसौ स्वीकुर्य्यात्तानि पत्राणि। यदर्ज्जितधनं कुसीददातृकोषेषु (बैंक) स्थाप्येत, तदाऽपि तेषां परिक्षीणतामूलकनकारवचनस्य (दीवालियापन) आशङ्का तिष्ठति। उक्तमपि—

'कुसीदाद् दारिद्र्यं परकरगतग्रन्थिशमनात्' अद्यत्वे दृश्यतेऽप्येवमेव। अद्यत्वे बैङ्कानां दुरवस्था यत्र तत्र दृश्यते; बहव एव कोषा भङ्गं प्राप्नुवन्तः सन्ति। वर्त्तमानशासकाश्च स्वयमृणं याचन्ते, तेष्वपि को विश्वासः। क्वाऽधुना विश्वस्येत? यदर्ज्जितधनं व्यापारकर्म्मणि व्यापार्य्येत; तत्राऽपि तादवस्थ्यम्। अद्यत्वे को न वेत्ति व्यापार-दुरवस्थाम्। वराका वणिजो मूलधनं विनाश्य दारिद्र्योपासकाः + सँव्वृत्तास्सन्ति। यदर्ज्जितधनेन गृहादयः क्रीयेरन्, यदि तेषु मासिक-प्रदाता कोऽपि न तिष्ठेद् वर्त्तमानकालवत्; तर्हि किं गृहान् खादेम?

"आये दुःखम्"

यदि धनस्य आयः प्राप्येताऽस्माभिस्तत्रापि न सुखम्। यावदधिक आयो भविष्यति; व्ययवृद्धिरपि तथैव भाविनी। एतत्तु आस्ताम् तावत्; लोकानां वैशिष्ट्येन नैकटिकसम्बन्धिनामीर्ष्यादिग्धा दृष्टिरस्मान् दग्धुं चेष्टते। चोराणामपि कृपाकटाक्षाः स्वस्मिन् पतन्ति। राजकीयपुरुषाणामपि कस्मिंश्चिदभियोगे निमज्जयितुं करवृद्धिं वा विधातुं चेष्टा प्रवर्त्तते। विविधाश्च सभा अपि स्ववार्षिकविवरणानि प्रहायं प्रहायं स्वदुरवस्थाश्च प्रदर्शं प्रदर्शं दानार्थं कदर्थीकुर्व्वते। भिक्षुकाणां घटा च शयने जागरणे, चलने उपवेशने, स्थितौ इतस्ततो गतौ च स्वपत्नीव अस्मद्वियोगं न मृष्यति; समीपस्थितिश्च न जहाति।

"यथाऽऽमिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि।
आकाशे पक्षिभिश्चैव तथा सर्व्वत्र वित्तवान्"

इत्युक्तिं सुतरामर्थोऽनुधावति।

"व्यये दुःखम्"

एतत्तु सर्व्वजनवेद्यमेव। गृहे प्रणयिनी रोगाक्रान्ता भवति; वैद्य आहूयते। रोगपरीक्षणसमये औषधिप्रदानव्यतिकरे च स 'देवः' प्रतीयते। आरोग्ये च जाते स एव 'देव' कोटितो भ्रष्टो मनुष्यो ज्ञायते। परं यदाऽसावौषधमूल्यं

+ सँव्वृत्ताः। अत्राऽनुनासिको वकारः। मुद्रका अत्र प्रमाद्यन्ति, 'सम्वृता' इति च मुद्रयन्ति।

याचते; तदा त्वसौ 'पिशाचः' प्रतीयते। कथमेतत्? तन्मूलन्तु—'व्यये दुःखम्' इति। अद्य लवणं नास्ति, अद्य इन्धनानामभावः, ह्यः सर्पिर्ह्रासिमानमाप्नोत्, श्वः 'सूपः' समाप्तिमेता*। दीपकप्रज्वलनाय × तैलं न विद्यते; शाक आनेयः, अद्येदं भूषणम्भग्नम्, अद्यत्वेऽस्य भूषणस्य पुरातनाकारं लोको न स्वीकरोति इत्यादीनि वचांसि यदा श्रूयन्ते; अर्जितधनव्ययभिया ※ वपुष एव शोषो जायते। श्रीमती चिन्तादेवी भृशमस्मानालिङ्ग्य अङ्गरुङ्गं विदधती अस्मान्निर्वीर्य्यान् विधत्ते। को नाम न लोचनगोचरीचरीकरीति दुर्दशामिमाम्। तत् किं विदधीमहि? किं त्रिशङ्कूयिता भवेम? चिन्ताऽपोहनस्य क उपायः? कथं श्रीमत्याश्शान्तिदेव्याः सर्वाङ्गीणालिङ्गनं प्रपद्य अमन्दानन्दसन्दोहं प्रपद्येमहि?

यावदिष्टसिद्धिर्न भवति; तावदुच्चैर्जोघुष्यताम्—

"धिगर्थान् कष्टसंश्रयान्"

———

दुर्गाष्टकम्।

ले०—सीतारामशास्त्री काव्य-व्याकरणतीर्थः फतेहपुर (जयपुर)।

जयति शुम्भनिशुम्भविघातिका।
कुटिल-कौणप-कण्टककर्तिका॥
निरवलम्बवलम्बनदायिनी।
भगवती ददती शरणं सताम्॥ १॥

इन्द्रे संवृद्धतन्द्रे निहितवति करं कर्णयोश्चापि चन्द्रे,
मूकीभूते मुरारौ परिकलयति संव्रीडनं ह्यन्धकारौ।
आकर्ण्योद्धारयाच्ञामधमतरनरस्यास्थितस्याश्रितत्वम्।

---

* एता। 'अनद्यतने लुट्'।

× प्रज्वलनाय। प्रोपसृष्टाज्ज्वालयतेर्ल्युटि 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' इति नित्यं मित्त्वे ह्रस्वः। णेर्लोपः। 'युवोरनाकौ'। 'प्रज्वालनाय' इत्यादौ तु 'प्रज्वलनं प्रज्वालः। भावे घञ्। तं करोति-इति प्रज्वालयति। 'तत्करोती'ति णिच्। ततः 'प्रज्वल्यते' इति भावे 'ल्युट् च'। णेर्लोपः।

※ व्ययभिया। अत्र कारकपूर्व्वपदत्वाद् यद्यपि 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इति नियमाद् 'एरनेकाच' इति यणा भाव्यम्, तथाऽप्यत्र बुद्धिकृताऽपादानस्य अविवक्षणाद् 'व्ययसम्बन्धिनी भी' रित्युत्तरपदलोपाद्वा दीक्षितोक्तदिशा यण् अनादृत एव।

योपादत्ते स्वभावातिसुलभदयया तां नमामो मृडानीम् ॥ २ ॥
दुर्गा देयादुदीतं दुरितदलगदोद्गालने सिद्धहस्ता।
त्रस्त-त्राणप्रवीणा पतिततरमहापापसंतापलीना ॥
भासा संलज्जयन्ती शतशशधरभाः सक्षणाज्ञानतद्वे।
भक्तानां दीर्णदैन्या भवदवदवथूद्रावणे वद्धधीर्नः ॥ ३ ॥
उद्दण्डमुण्डपरिखण्डनचण्डकर्म-प्राप्तप्रतिष्ठनिशितास्त्रनिकृत्तदैत्या।
शैत्याय दुःखदहनस्य समस्तु सा नो, देवी दयार्द्रहृदया तनया हिमाद्रेः ॥४॥
उद्दामदानवदलाक्रमदूनदेव-दारासमाश्रयणदानप्रसिद्धशौर्या।
क्रौर्यान्धकारहरणे श्रितभानुभावा, भावात्मिका मम मनक्तु भयं भवानी॥५॥
आलक्ष्यते तव विलक्षणपक्षपातो,-मातः सुरक्षणविधौ परिपीडितानाम्।
अज्ञानदुर्दमगजाक्रमविक्लवं मां दुर्गे दयामयि कथं विजहासि दीनम् ॥६॥
विस्मायिमायाशतरक्तरक्तबीजास्रसंपाननिवृत्ततृष्णा।
उद्वृत्तवाहारिविदारिणी मे, दुर्गा प्रदेयाद्धि कृपावलम्बम् ॥ ७ ॥
प्रयातोऽस्तं पूषा, निशि हिममयूखस्तु विकलः,
समूहस्ताराणां जलधरगणैरावृततनुः।
न वा दीपोद्दीप्तिर्वहति पवमानो जननि तव,
प्रयाचे ध्वान्तेऽहं तव खलु दयाभासमुदयम् ॥ ८ ॥

श्रद्धाञ्जलिः।

(शोकसभायां पठिताः श्लोकाः)

ले०—शुद्धाद्वैतमार्तण्ड-वेदान्तविद्यानिधि-महामहोपदेशक-कविकाव्य-रत्नाकर-भट्टश्रीबलभद्रलालजी शास्त्री, मथुरा।

श्रीमन्तो मथुरापुरी-बुधसभा-सौभाग्य-भूषा-सती-
सर्वस्वायितभाललालितलसत्सिन्दूरबिन्दूपमाः ॥
ज्योतिर्विद्विबुधावलीमणिमयालङ्कारलक्ष्मीभृत-
स्ते केषां न शिवप्रकाशसुधियो विद्यावतां गोचराः ॥ १ ॥
यैरुद्भासितमात्मना द्विजकुलं विद्वत्कुलं विद्यया।
सौशील्येन वशंवदीकृत इव प्रायः समस्तो जनः ॥
धर्माधर्मविचारणापरिणमत्पाण्डित्यरत्नप्रभा-

निर्ध्वस्ताखिललोकलोचनतमस्तोमास्त एते बुधाः ॥ २ ॥
हन्ताऽधुना ते न भवन्ति भूमौ विद्वज्जनानां समितौ प्रकाशाः ।
दिवं विधातुं विशदप्रकाशां प्रतस्थिरे किन्तु शिवप्रकाशाः ॥ ३ ॥
तद्वियोगव्यथाव्यर्थीभवज्जीवनभूतयः ।
शोचन्ति हन्त सर्वेऽपि वाष्पपूर्णानना जनाः ॥ ४ ॥

श्रद्धाञ्जलिः ।

(शोकसभायां पठिताः श्लोकाः)

ले०—आयुर्वेदाचार्य-विद्यावाणीभूषण-पौराणिकरत्न-पं० श्रीसोहन-लालपाठक M. R. A. S. शास्त्री मथुरा ।

धनागमेशाः मथुराबुधेशाः शिवप्रकाशा गणितप्रकाशाः ।
विहाय मित्राण्यनुगाँश्च हन्त ! स्वर्गं गता ब्राह्मणमौलिचन्द्राः ॥१॥
यैरस्यापि महोदयैर्बुधकृते ज्योतिःप्रकाशस्थली ।
सम्राजः सदसीन्द्रपत्तनमिताः संलेभिरे स्वासनम् ॥
वारम्वारमनेकविघ्नविहता संरक्षिता विःसभा ।
ते श्रीमान्यशिवप्रकाशसुधियः स्वर्गं गता ह्यऽधुना ! ॥ २ ॥
विद्वांसो विधना रमाकृतदयाः प्रायो भवन्त्यज्ञकाः ।
यत्र श्रीर्भवति प्रसिद्धमिति नो तत्रैति वागीश्वरी ॥
मैजिस्ट्रैट-शिवप्रकाशविदुषि प्रभाजितं तद्द्वयम् ।
तेनैवाकरुणेन हन्त ! विधिना नीतो धनो पण्डितः ॥ ३ ॥
पौरस्त्यो भवति प्रतीच्यमनुजात् स्पष्टं विरुद्धस्सदा ।
औदीच्योऽपि च दाक्षिणात्यजनुषो भिन्नेऽपि तिष्ठत्पथि ॥
आश्चर्यं मथुरास्थले समधियः सर्वे कृताः पण्डिताः ।
यैस्ते श्रीलशिवप्रकाशसुधियः स्वर्गं गता ह्यऽधुना ॥ ४ ॥
सर्वास्वेव कलासु यश्च समये स्वीयेऽद्वितीयोऽभवत् ।
नीतिर्यस्य विलक्षणा जनहिते दृष्टा सदा माधुरी ॥
ज्योतिर्वैद्यशिवप्रकाशजिदहो त्यक्त्वा भवन्निष्फलम् ।
ज्योतिःशास्त्रनिधिर्विहाय मथुरान्नक्षत्रलोकं गतः ॥ ५ ॥

"किमस्पृश्यानां देवालयप्रवेशस्याभिलाषा वर्तते"

लेखक—धुण्डिराजशास्त्री काव्यतीर्थः, इन्दूरस्थः ।

अयि सज्जनाः सारासारविचारचणाः, सद्वरेण्याः, किमिदं सत्यम् ? यदस्पृश्या मन्दिरप्रवेशप्राप्त्यै जलनिर्गतमत्स्यायमानाः सन्तीति । नहि, अहं त्विदमतात्त्विकं मन्ये । नहि, तेषां धिषणाऽऽत्मन एव पादप्रहाराय तान्प्रवर्तयिष्यति । ते त्वेवमेव मनसि विचारयन्ति, "यदेते सुधारणाधुरीणा यदि नो मन्दिरप्रवेशानुमत्यै यतन्ते यतन्तां नाम । नहि तेनास्माकं काऽपि हानिः, यदि प्रवेशनानुमतिभाजो भवामस्तर्हि अनायासेनेशदर्शनपुण्यभागिनोऽपि भविष्यामः, यदि चैतेषामयं प्रयत्नः शारदीयमेघायितः स्यात्तर्हि, अस्माकमद्य यावद्यादृश्युपजीविकाऽभूत् तादृश्येव पुरोऽपि भविष्यति। तदा तु वयमीदृशा एव भविष्यामः, "अहोऽस्माकं मौनमेव संमतीकृत्याधर्माय चेष्टमानानां युक्तमिदं वैफल्यम् । को हि नाम जात्युपदिष्टं व्यवहारं सहसा त्यक्तुं सज्जीभविष्यति । एतन्नैभिर्मन्दप्रज्ञैरालोचितम् । इति ।

एतादृशं संमानं यदा सुधारणाग्रगण्या^प्राप्स्यन्ति तदा तेषां का गतिः स्यात्पक्षद्वयस्यापि परिहासस्थानं गतानाम् ?

दृश्यन्ते कुत्र कुत्र केचिदस्पृश्या मन्दिरप्रवेशाय प्रयतमानाः । किंतु तादृशा अस्पृश्यास्त एव येषां आंग्लीयभाषासंपर्कदूषितस्वांतेषु, आत्मानं विद्वांसं मन्यमानेषु लब्धोच्चपदवीकेषु अस्पृश्यधुरीणेषु श्ववृत्तिरेवेष्टा ।

वास्तविकतयाऽस्पृश्यधुरीणानां क्षुधा न केवलेन देवतालयप्रवेशेन शममेष्यतीति तैरधुनैवोद्घोषितम् । ते तु कथयन्ति, "न वयं केवलाय देवालयप्रवेशायैव स्पृहयामः, किंतु यदा चातुर्वर्णिकाः हिंदुनामकमेकमेव वर्णं विधाय परस्परं विवाहभोजनादिकं व्यवहारं करिष्यन्ति, तदैव वयं स्पृश्यैरद्य यावत्कृतस्य पापस्य प्रणाशः संजात इति मंस्यामः ।" न हि अधुनाऽपि अस्माकं देवतानामभावः, वयं तु पारमार्थिकोन्नतिसाधनेन देवतारूपेण परिपूर्णाः स्म एवातो न तस्याधुनाऽपेक्षा, किंतु व्यावहारिकसाधनानामेवापेक्षाऽस्माकं वर्तते । तां यदि स्पृश्या अस्मभ्यं दास्यन्ति तदैव वयं कृतकृत्या भविष्यामः ।

सुधारकाः ! एतत्स्वरूप एवास्य परिणामो भविता । तद्भवतामयं व्यापारोऽव्यापारेषु व्यापार एव भविष्यति । भवद्भिर्महताऽऽयासेन प्रवृत्तेऽपि गगनकुसुमायमाने देवालयप्रवेशे न तेषां तावता क्षुद्रेण फलेन समाधानं भविता ।

वास्तविकतया स्पर्शास्पर्शव्यवहारलोपप्रयत्नोऽपि नास्पृश्यसंमतः । यदि संमतः स्यात्तर्हि त आदावेव स्वज्ञातिगं स्पृश्यास्पृश्यसहभोज्याभोज्यादिकव्यवहारं भङ्क्त्वाऽस्मान्प्रति स्पृश्यास्पृश्यादिव्यवहारनाशनाय प्रार्थयेरन् । किंतु न तादृक्किमपि दृष्टिपथमारोहति ।

तस्मादात्मानं सनातनीयं मन्यमानानां सुधारकचणानामयमपि प्रयत्नोऽव्यापारेषु व्यापार एव भवति ।

तस्मात्सनातनधर्मावलम्बिनः, धर्मैकशरणाः, सत्पक्षपातिनः, सच्छ्रेष्ठाः, एतदेव विज्ञाप्यन्ते; यत्र तैरारंभशूराणां सनातनधर्मकीटानां सुधारकाणां फटाटोपकल्पं बहुलं व्यवसायं दृष्ट्वा, ऐहिकपारलौकिकनिःश्रेयससाधकाद्धर्मात् प्रभ्रष्टव्यम्, तैस्तु स्वानुयायिनः सनातनधर्मपथ एव स्थिरीकर्तव्याः । आरम्भशूराणामेतेषामयं यत्नो विफलीभविष्यतीति पाषाणोट्टङ्कितमक्षरमिदम् । एतादृश आचरणे केचित्कानिचित्कष्टान्यवश्यमनुभवेयुः, परंतु तादृशकष्टसहनमपि धर्मरक्षणार्थमावश्यकमेव । यतो हि भगवता गीतायां प्रणीतमेव यत्:—

"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः"

विहारोत्कल-संस्कृतपरीक्षायाः समीक्षणम् ।

—:०*०:—

अयि ! सूर्योदयपाठका महानुभावा विद्वद्वराः तथा प्रियसुहृदोऽन्तेवसन्तः अन्ये च सन्तस्तत्रभवन्तो भवन्तो निभालयन्तु याऽऽस्माकीना प्राचीनपठनपाठनप्रणाली एतादृशी प्रचलिताऽऽसीत्, यया यावन्तः पिपठिषवो यस्मिन् कस्मिन्नपि विषये श्रमं विदधति स्म तस्मिन् तस्मिन् विषये पारंगताः सन्तः तत्तद्विषयाऽध्ययनार्थमागतानन्तेवसतः स्वकीयाऽध्यापनचातुर्येण सम्यग्बोधयन्तो विद्वांसस्तान् तोषयन्तिस्म । तुष्टाः सन्तस्तेऽन्तेवसन्तः स्वकीयाम्पूर्वोक्तां प्रणालीं सोपानपरंपरामिवाऽऽरोहन्तिस्म ! हा धिक् ! इदानीन्तने काले, अस्माकं दौर्भाग्येन कालविपरिणामेन वा सकलमनोरञ्जनीभूतां तां पूर्वोक्तामार्यप्रणालीं हायं हायं तदितरीभूतां परीक्षाऽऽख्यां प्रणालीं गृह्णन्तः परीक्षाऽऽनुपूर्व्येण ग्रन्थस्थ-परीक्ष्यस्थलान् जोघुष्यमाणा आधुनिका छात्रव्राताः सर्वानपि मुनिप्रणीतान् ग्रन्थान् समूलान् नाशं नाशं स्वयञ्च नश्यन्ति । अन्यप्रान्तीयपरीक्षाप्रणाली तु दूर एवाऽवतिष्ठताम्, आदौ विहारोत्कलसमितिपरीक्षाप्रणाली एवाऽवलोकिता भवतु । तत्र हि परीक्षामनुसरन्तश्छात्रा परीक्ष्येतराणां ग्रन्थानां

पठनमवलोकनं वा कदाऽपि कुर्वन्त्येव नहि। परीक्षायामपि प्रथमायां रघुवंशनामकग्रन्थस्य सर्गद्वयमेव स्थापितमस्ति ततोऽवशिष्टानां सर्गाणान्तु तिसृष्वपि परीक्षासु प्रथममध्यमोत्तमासु नास्ति कुत्राऽपि चर्चा। एवं व्याकरणसाहित्यमध्यमायां काव्यरत्नस्य किरातस्य सर्गद्वयमात्रं दशकुमारचरितस्य पूर्वपीठिकामात्रम् आर्याणां धर्मप्राणभूताया मनुस्मृतेः द्वितीयाऽध्यायमात्रस्थापनम्, संस्कृतसमितिकार्यसञ्चालकानां कीदृशीं सुरसरस्वतीसेवां द्योतयतीति विज्ञा एव विदाङ्कुर्वन्तु। इत्थञ्चोपाधिपरीक्षायामपि मनोरमाया अव्ययीभावान्त एव सुगृहीतोऽस्ति एवं महाभाष्यस्याऽपि नवाह्निकमात्रं वर्तते इति हेतोः परीक्ष्येतराणां ग्रन्थानां ग्राहकाऽभावेन परीक्षामनुसृत्यैव यन्त्राऽऽलयाऽध्यक्षेणाऽपि यन्त्राऽऽलयतः पुस्तकमुद्रणं कार्यते। यन्त्रितेतराणान्तु लोप एवाऽनुदिनं बोभवीति न तु प्रकाशः इत्थङ्कारं साहित्याऽऽचार्यपरीक्षायामपि अलंकारविषयस्य अलंकारसर्वस्वस्य सर्वथैव उपेक्षा वर्तते। पुनः ध्वन्याऽऽलोकग्रन्थीयतृतीयोद्योतस्य निष्कासनमदूरदर्शित्वमेव द्योतयति तेषाम्। अस्माभिः किं क्रियेत? अस्माकं वचः केऽपि न शृण्वन्ति, मदीया गुरवोऽपि वेतनेनैव कृतकृत्याः संस्कृतसमाजस्य दीनां दशां नैव निभालयन्ति। अपि पश्यन्तु भवन्त एव उक्तप्रकारेण पठतां शास्त्राऽऽचार्यपरीक्षोत्तीर्णानां सविधेऽध्ययनार्थं गम्येत चेत्, मूलटीकाऽवलोकनव्यग्राः सर्गद्वयाऽवशिष्टस्य रघुवंशस्य, अपि च परीक्षावहिर्भूतस्य यस्य कस्याऽपि ग्रन्थस्याऽध्यापनसमये स्वेदयुक्ता भवन्ति त इति। यावद् एषा प्रणाली प्रचलिता स्यात्, तावत् सुरभारत्याः कथमपि समुन्नतिर्न भवेत्, यदि एवैव प्रणाली श्रीमतां स्वान्तःसद्मनि साधीयसी कृतसंकेता तदा, अखिलभारतवर्षीयसंस्कृविश्वविद्याऽऽलयद्वारा काचनैतादृशी परीक्षा स्थापिता स्यात् यस्यां प्राचीनपठनपाठनप्रणाल्यनुसारेण, आर्षग्रन्थानां निर्वाचनं भवेत्, अन्यथा सुरभारती-समुन्नतिसम्पादनं मनोमोदकभक्षणप्रायमेव। इति—

खगेश्वरशर्मा उपाध्यायः।

(जनकपुरस्थ-राजकीय-संस्कृतविद्यालयस्थः)

———

श्रीवदरीनाथाष्टकम्।

—०:※:०—

(ले०—श्रीबालकृष्णभट्टशास्त्रि-साहित्याचार्यः, प्र० अ० गुप्तकाशी)

त्वत्तापसीं सकलमङ्गलमञ्जुमूर्तिं,
दृष्ट्वा कदा सफलतान्तु नये स्वकीयाम्।

नाथ ! स्पृहां सुचिरसञ्चितभावदिव्यां,
त्वामानतोऽस्मि भगवन् ! बदरीविशालम् ॥ १ ॥

गङ्गातरङ्गतरलायिततीरमध्ये,
दीप्तां महाहिमगिरेर्बदरीवनस्य ॥
द्रक्ष्ये कदा नरहरे ? भवदीयमूर्तिं,
त्वामानतोऽस्मि भगवन् ? बदरीविशालम् ॥ २ ॥

दृष्ट्वा समाधिविलसत्सुकृतन्तपस्त्वद्,
भीतो न किं स मखभुग्विहितान्तरायः ।
सोऽकिञ्चनोऽजनि न किं जगदेकवन्द्य !,
त्वामानतोऽस्मिभगवन् ! बदरीविशालम् ॥ ३ ॥

नाथ ! त्वदीयचरणाम्बुजतोषकोषे,
स्पृहा कदैत्य मम चेतसि मञ्जुमूर्तिम् ।
नत्वा त्वदीयकुशलां कुशली भवेयम्,
त्वामानतोऽस्मि भगवन् बदरीविशालम् ॥ ४ ॥

या गन्धमादनलतोल्लसिता सिताते,
त्वद्ब्रह्मनारदशिवादिकदिग्मुखानाम् ।
कुण्डैस्तथा शम्शिलाश्रितदिव्यमूर्ते !
त्वामानतोऽस्मि भगवन् बदरीविशालम् ॥ ५ ॥

या नारदोद्भवगणेशमहेश्वराद्यैः,
संसेविता स्तुतिमुखैः स्तवनीयमूर्तिः ।
सा तापसी तव विभो शिवमातनोतु,
त्वामानतोऽस्मि भगवन् बदरीविशालम् ॥ ६ ॥

नीचोपि ते यदि सकृत्कुरुते मनस्वी,
संदर्शनं भवभयाद्भवति प्रसन्नः ।
त्वां विहाय कतमोऽन्यसुरं श्रयेत,
त्वामानतोऽस्मि भगवन् बदरीविशालम् ॥ ७ ॥

रोगोऽस्तु चेन्मयि विभो स्तवनस्य तेऽसौ,
शोकस्तवैव विरहस्य तथान चान्यः ।
मन्ये कृपां यदि तथा सफलोद्भवञ्च,
त्वामानतोऽस्मि भगवन् बदरीविशालम् ॥ ८ ॥

श्रीबालकृष्णरचितं विधिनाष्टकं ये,
भक्त्या पठन्त्यनुदिनं नितरामिहेदम् ।
ते रोगशोकरहिता दुरितान्तरायान्,
दूरं निरस्य परमं पदमाप्नुवन्ति ॥ ९ ॥

———

कालिदासस्य रघुः

—०:ॐ:०—

लेखिका—श्रीमती रत्नीदेवी सार्द्धद्वादशवर्षवयस्का, (हाथरसवास्तव्या)

कविशिरोमणिना कालिदासेन स्वकीये मनोहरे काव्ये दिलीपात्मजस्य रघोः कीदृशम् हृदयग्राहकम् चरित्रं चित्रितम्। तदिह निजस्वल्पबुद्ध्यनुसारेण पाठकानां सेवायां समर्पयामि।

चरित्रनायके रघौ संजात एव राज्ञो दिलीपस्य सकलाश्चिन्ताः कर्पूरपरागवत्सपदि लुप्तिं गताः। तस्यैवान्तःपुरं केवलमानन्दविस्फूर्जितं नाभूत्। किन्तु अमरभवनान्यपि तज्जन्मप्रसादेन प्रमोदमयानि जातानि।

किंचिद्दिनानन्तरं रघुः पित्रोर्लालनात् शुक्लपक्षे चन्द्र इव वृद्धिं प्राप पितरावपि तस्य बालचापल्यमनुभवन्तौ प्रमुदितौ जातौ। रघुर्धात्र्या अङ्गुलिं गृहीत्वा चलति, तया कथितां वार्तामनुवदति च धात्र्याः शिक्षायास्तस्योपरि एतादृशप्रभावोऽभूत् यत्स बाल्यभाव एव वृद्धवन्नम्रोऽभूत्।

यदा रघुरुपनयनसंस्काराधिकारी जातः, तदा दिलीपः गुरुदेवेन तस्योपनयनसंस्कारं कारयित्वा तं गुरोः सेवायां विद्याध्ययनाय समर्पितवान्। गुरुसेवां कुर्वता तेन रघुणा समस्तविद्यासागरपारं गतम्। गुरोराशीर्वादं गृहीत्वा स स्वगृहमायात्। पूज्यपादात्स्वपितुरस्त्रशस्त्रविद्यामशिक्षत। स्वल्पकालानन्तरं तेन अस्त्रविद्यायामपि विशेषयोग्यता प्राप्ता, अतः स क्षितौ अद्वितीयो धनुर्धरोऽभूत्। तदा दिलीपस्तं सर्वगुणसम्पन्नं ज्ञात्वा तस्य एकस्य उच्चकुलस्य कन्यया सह विवाहमकारयत्।

रघुः पूर्णयुवाऽऽसीत् तस्य भुजे युगवत् विशाले आस्ताम्, तस्य वक्षःस्थलं विस्तारे कपाटमपि लज्जयते, तस्य ग्रीवा कपोतस्यापि मानं खण्डयति, अतः पुत्रस्य गुणैर्मुग्धेन दिलीपेन तस्मै युवराजपदं समर्पितम्। राज्यश्रीरपि एकाकिनी नावसत्। सापि रघुं सर्वगुणसम्पन्नं ज्ञात्वा तस्यैव वरणे उत्कण्ठिताऽऽसीत्, अतः सा असक्तं तं मत्वा त्यक्त्वा च नृपं दिलीपं रघोः समीपे गतवती।

अत्र राजा दिलीपः स्वर्गाधिपत्येच्छया एकोनशतयज्ञान् चकार। अद्य स शततमं यज्ञं करोति। तन्निमित्तं अश्वं विसर्जितवान् तस्य तुरगस्य रक्षार्थं ससैन्यं राजकुमारं प्रेषयत्, तत्र गुप्तरूपेण इन्द्रः तमश्वमचोरयत्, तत्समये राजकुमारस्तत्सेनाश्च अश्वं नावलोक्यातिव्याकुला बभूवुः। तत्क्षणे अकस्मा-

नन्दिन्या दर्शनमभूत् । तस्य मूत्रेण नेत्रे प्रमृज्य स रघुः पूर्वस्यां दिशि अश्वं-हरन्तं सहस्रनेत्रं इन्द्रं ददर्श तदा रघुरुच्चैःस्वरेणोवाच । हे देवेन्द्र ! भवांस्तु यज्ञे भागाधिकारी यज्ञे विघ्नकारिणां दण्डदाता च, तथापि यज्ञकार्ये नियुक्तस्य मे पितुः कार्ये भवानेव विघ्नं करोति । इन्द्र उवाच । हे रघो ! भवतः पिताऽस्मात् यज्ञान्मे इन्द्रपदवीं ग्रहीतुमिच्छति । रघुर्जगाद, हे शचीपते ! एनमश्वं त्यज, यदि घोटकं त्यक्तुन्नाभिलषसि तदा रघुणा सह युद्धं कुरु, युद्धे मामनिर्जित्य तव कुशलन्नास्ते ।

इति कथयित्वा रघुरस्त्रमग्रहीत् । उभयतः युद्धारम्भोऽभूत् । इन्द्रेणापि स्वपूर्णबलं दर्शितम्, रघुरप्यस्त्रविद्यायां निष्णात आसीत् । रघुरिन्द्रस्य भुजच्छेदं कर्त्तुं वाणं प्राक्षिपत् । सक्रोधः शक्रोऽपि वज्रं प्रायुंक्त । तस्य स्पर्शादेव रघुर्मूर्च्छितोऽभूत्, परमल्पकालानन्तरं अपगतां तस्य मूर्च्छां दृष्ट्वा तत्सेनाऽपि प्रामोदत । प्रमुदितमानसेन पाकशासनेनोक्तम् । रघो ! तुष्टोस्म्यहं तवानेन पराक्रमेण । यन्मम वज्रं बलिनः गिरयोऽपि सोढुं नाशक्नुवन् । तन्मदीयं वज्रं भवता सोढम् अत एव त्वय्यहम् प्रसन्नोऽस्मि । अश्वं विहाय वरं वृणुष्व ॥

रघुर्जगाद, हे देवेन्द्र ! यदि वाजिनमत्याज्यं मन्यसे तदा पित्रे शततमस्याध्वरस्य फलं वितर । इदं निशम्य शचीश्वरः "तथास्तु" इत्युक्त्वा स्वस्थानं गतवान् । रघुरपि स्वसेनया सह सद्म प्रत्यावर्तत । दिलीपेन तस्य पौरुषस्य वृत्तान्तं मातलिसारथेर्दूतेन पूर्वमेव ज्ञातम्, अत एव तेन तमङ्के संस्थाप्य तस्य व्रणेषु हस्तस्पर्शो विहितः । तेन सुरपुरं समारोढुं यज्ञानां शतं सोपानपरम्परासमं निर्मितम् । पुनः स पुत्राय राज्यं समर्प्य स्वयं कानने तपस्तप्तुं ययौ ।

राज्ये नियुक्तं तं राज्यश्रीर्गुप्तरूपेण सेवितवती । स एतादृशः पराक्रमी आसीत् यत्तेन पित्र्यं राज्यं सकलं रिपुकुलं च सममेव समाक्रान्तम् । इन्द्रादपि स अधिकबली आसीत्, दशदिग्विजयाय तेन जैत्रं धनुः हस्ते कृतम् । धृतधनुष्कः सानीको रघुः दिग्विजयाय प्रतस्थे,तदीयं यशः शरदिन्दुकुन्दघनसारहारमृणालसुरगजसरोजकैलाशसमं सितमासीत्, स स्वकीयेन अतुलेन पौरुषेण भूमण्डलवर्तिनो राज्ञो विजित्य तत्र निजं प्रभुत्वं संस्थाप्य तान्स्वाधीनान् कृतवान् । सर्वत्र जयस्तम्भं स्थापयन् जयश्रियं प्राप्नुवन् छत्ररहितानि राज्ञां शिरांसि-धूलिमयानि सम्पादयन् स प्रमुदितमनाः स्वराज्यं प्रतिन्यवर्तत ।

रघुणा प्रतिपादितजीवहिंसापराधनिराकरणाय प्रायश्चित्तस्वरूपो विश्वजिन्नामकोऽध्वरो विहितः । तेन सकलाः संपत्तयो दाने दत्ताः । तदा सर्वस्व-

दानानन्तरं कौत्सनामको ब्रह्मचारी वरतन्तुशिष्यः तत्समीपे आयात्। राजा तस्यातिथ्यसत्कारं मृत्पात्रेण चकार।

कौत्सः तत्पूजां दृष्ट्वा निराशोऽभूत्। राजोवाच-हे ब्रह्मचारिन्! भवान्-केन निमित्तेन आयातः, कौत्सेनोक्तम्। भवानस्मिन्समये स्थाणुरिव दृश्यते। अतः भवन्तं गुरुदक्षिणां याचितुं नोत्सहे। रघुरुवाच। हेद्विजश्रेष्ठ! क्षत्रियाणां वित्तं कोषं च बाहावेव भवतः। कौत्सोऽवोचत्। राजन्! गुरुदक्षिणायै चतुर्दशसहस्रं सुवर्णम् अहमिच्छामि। दिलीपनन्दनः प्रावोचत्, हे अग्रजन्मन्! त्वं मम पवित्रे अग्न्यागारे अग्निरिव द्वित्राण्यहानि स्थातुमर्हसि। इत्युक्त्वा रघुः स्वकीये स्यन्दने शस्त्राण्यस्त्राण्यस्थापयत्। रात्रौ तस्मिन्नेव सुप्तः। प्रातःकाले यदा कुवेरात् धनमानेतुमिच्छति तदैव तत्रत्याः रक्षापुरुषाः आगत्य प्रोचुः, हे चक्रवर्त्तिन्। रात्रौ नभस्तः पतितसुवर्णस्य वृष्टिः कोषगृहे जाता। इदं निशम्य हृष्टेन रघुणा तां सर्वां सम्पत्तिं कौत्साय ददौ, कौत्सः सर्वं वित्तम् उष्ट्रेषु संस्थाप्योवाच, भूपाल! यदि राजानो महीं दुहन्ति तदाश्चर्यं न, परं भवान्तु ऐश्वर्यप्रभावेण दिवमपि दुग्धवान्।

पुनः "आत्मानुरूपं पुत्रं लभस्व" इति आशिषं दत्त्वा स्वगृहं गतः। तस्य नियते समये सुतोऽभूत्, स तस्य नाम अज इति चकार। गृहभारयोग्यं निजं पुत्रमवलोक्य तस्मै राज्यभारं समर्प्य वनं गन्तुमनाः पुनः सुतानुरोधेन नगराद्बहिः कुटीं कृत्वाऽवसत्, किंचित्कालानन्तरं योगेन शरीरमजहात्।

हे रघो! धन्यस्त्वं श्लाघ्योऽसि यतस्त्वया स्वचरित्रबलेन सुरराजोऽप्यधःकृतः।

समाचाराः।

षड्दर्शनसाधुसम्प्रदायस्य निर्णयः।

अवन्तिकायां (उज्जैननगरे) कुम्भमेलावसरे षड्दर्शनसाधुसम्प्रदायस्य माननीया धर्माचार्या अनेकमठाधीश्वरा मोहान्ताश्च समुद्घोषितवन्तो यद् अस्पृश्यतानिवारणम् अन्त्यजेभ्यो देवमन्दिरप्रवेशाधिकारप्रदानञ्च सर्वथा धर्ममर्यादाविरुद्धमशान्तिजनकञ्च वर्त्तते। इयमुद्घोषणा सर्वसम्मत्या सर्वसम्प्रदायाचार्यैरखिलैर्माननीयमोहान्तैश्च धर्मविरुद्धमान्दोलनम्प्रति घोरं विरोधं दर्शयद्भिः स्वहस्ताक्षरैः प्रकाशिता। अत्र येषां परहंसपरिव्राजकाचार्यमण्डले-

श्वराणां श्रीस्वामिवर्याणां स्वरूपानन्दजयेन्द्रपुरी-विद्यानन्दगिरिप्रमुखानां धर्माचार्यवर्याणां जूनामठाधीश्वरमोहान्तश्रीशंकरपुरीश्रीनिरञ्जनीमठाधीश्वरमोहान्तरामनारायणगिरिप्रभृतीनां मोहान्तवर्याणां हस्ताक्षराणि वर्त्तन्ते तदधीनाः सहस्राधिकाः साधवो नागा मोहान्ताश्चासते, तस्मात्तन्मण्डलेश्वरहस्ताक्षरेणैव तदायत्तनिखिलसाधुसमाजस्य हस्ताक्षरमवगन्तव्यम्। किं बहुना, तैर्घोषणायामन्ते स्पष्टं व्याहृतम् यत् सर्वैर्धार्मिकप्रजासमूहैः सनातनधर्ममूलसिद्धान्तसंहारकं सनातनमर्यादाविरुद्धमशान्तिजनकमिदमान्दोलनं विरोध्य धर्मप्राणतायाः पूर्णं परिचयं प्रयच्छद्भिः धर्मरक्षार्थं दृढं प्रयतितव्यम्।

बलिया-सनातनधर्मसभाया मन्त्रिमहोदयः सूचयति—ज्येष्ठशुक्लगङ्गादशम्यामेकादश्याञ्च नगरस्य चतुर्वीथिकायां महता समारोहेण सनातनधर्मसभाया महोत्सवः समजनि। अत्र काशीतः श्रीभारतधर्ममहामण्डलस्य महामहोपदेशकः शास्त्राचार्यः साहित्यनिधिः श्रीमान् पं० गङ्गाविष्णुशास्त्री काव्यतीर्थः, मयपुर (मेरठ) नगरात् वर्णाश्रमसंघस्य प्रधानसञ्चालको विद्वद्वरः श्रीमान् मोहनलाल-अग्निहोत्रिमहोदयः, चन्दौसीवास्तव्यो भजनोपदेशकः श्रीमान् विष्णुदत्तशर्मा, तथैतत्प्रान्तीया अनेके विद्वांसो वक्तारः सम्मिलिता अभूवन्, वाराणसेय-विडलाविद्यालयस्य प्रधानाध्यापको व्याकरणाचार्यो वैयाकरणकेसरी श्रीमान् पं० सभापति-उपाध्यायमहोदयः सभापतेः पदमलङ्कृतवान्। वर्णव्यवस्थाया उद्देश्यमवलम्ब्य श्रीमता गङ्गाविष्णुशास्त्रिणा सयुक्तिकं सप्रमाणं सामयिकं प्रभावोत्पादकं मनोहरं व्याख्यानं दत्तम्। यच्छ्रुत्वा श्रोतारो घण्टाद्वयं यावच्चित्रलिखिता इव विमुग्धा अभवन्। सहस्राधिकाः श्रोतारः समुपस्थिता आसन्। व्याख्यानावसाने केनचिद् आर्यसमाजीयेन विवेकानन्दस्वामिना कियन्तः सन्देहा विहिताः। तेषामपि समीचीनं हृदयग्राहि युक्तियुक्तं सप्रमाणमुत्तरं शास्त्रिमहोदयेन तत्क्षणमेव कृतम्। यस्य श्रवणमात्रेणैव दर्शकाः सानन्दाः सनातनधर्मस्य जयमुच्चैरकार्षुः। ततः पराजिता आर्यसमाजीयाः पलायिताः, सनातनधर्मस्यापूर्वविजयोऽभूत्। द्वितीयदिने भृगुमन्दिरे पुराणविषये शास्त्रिणा सारगर्भितं पाण्डित्यपूर्णं व्याख्यातम्। अद्य श्रीमतो मोहनलालशर्मणः अग्निहोत्रस्यापि परमओजस्वि भाषणमजनि। पण्डितश्रीविष्णुदत्तशर्मणो भजनोपदेशा जनताया मनोहरा शिक्षादायकाश्चाभवन्। अस्य सर्वं श्रेयो ब्राह्मणानामेतत्प्रान्तीयानां विशेषतः श्रीमतां भद्धेयानां पण्डितलक्ष्मीनारायणाचार्य्यमहोदयानां, पण्डितश्रीरामबालकशर्मणाञ्च वर्त्तते। येषां प्रशंसनीयप्रयत्नेन महत् धार्मिकं कार्यमेतत् समपद्यत।

छपरामण्डलीयविद्वत्सु विज्ञप्तिः ।

मान्याः श्रद्धेयाः प्रियसुहृदश्च छपरामण्डलस्था विद्वान्सः !

विदितमेव तत्रभवतां भवतां यदधुना—"सङ्घे शक्तिः कलौ युगे" इति महर्षिवराणां नियममाश्रित्य सर्वेऽपि भारतीया देशकालज्ञाः पाश्चात्यप्रणाली-परिचिताः स्वस्वजातिधर्मनेतारः स्वीयसमाजं जातिश्चोन्नमयितुं बद्धपरिकरा दृश्यन्ते । केवलं वयमेव संस्कृतज्ञा विद्वांसः उदासीना जागर्तियुगेऽप्यस्मिन् पश्चात्तनाः सञ्जाताः स्मः । अस्तु—"यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति श्रुतिमनुरुध्य अधुनाऽप्युत्थानकालोऽवशिष्यते ।

साम्प्रतं विहारोत्कलसंस्कृतकन्भोकेशनसदस्यताकृते तत्प्रान्तीयविदुषां नामानि संगृह्यन्ते । अतोऽस्माकं छपरामण्डलस्थविदुषामिदमावश्यककर्त्तव्यम् विद्यते, यत् कन्भोकेशनसदस्यताकृते ये स्वात्मानं तद्योग्यमवगच्छन्ति । ते सर्वेऽपि स्वनामानि लिखित्वा जुलाई मासस्य २५ तिथिपर्यन्तं रूप्यकैकेनै सदस्यता-शुल्केन सह सेक्रेटरी—

विहारोत्कलसंस्कृतकन्भोकेशन, पटना इति सङ्केतेन प्रहिण्वन्तु ।

एतेन अनायासेनैवास्माकं छपरामण्डलस्थानां संस्कृतसुधियां सङ्घः स्थापितो भवति, यतश्च संस्कृत-साहित्य-समाजस्य महान् लाभः स्यात् ।

सदस्ययोग्यता चेत्थमवसेया—

(१)—यस्य पण्डितस्य यस्मिन्मण्डले निवासो जन्मभूमिर्वा स्यात्तस्मिन्नेवैकस्मिन्मण्डले तस्य नामाङ्कनं भवेत् ।

(२)—विहारोत्कलप्रान्तीयो यः कोऽपि पण्डितो महाविद्यालये, विद्यालये, इंग्लिशविद्यालये वा पञ्चवर्षतः सम्पादितसंस्कृताध्यापनकार्य्यः ।

(३)—संस्कृतकौंसिलसभयाऽनुमोदितः, संस्कृत-विद्यायां लब्धख्यातिः ।

(४)—अङ्गीकृतविद्यालयाध्यापकेतरैः सर्वैरेव १) एकं रूप्यकं शुल्कं सदस्यत्वार्थमावेदनेन सहावश्यं प्रेष्यन्नोचेत् सत्यामप्यन्ययोग्यतायां नामोल्लेखो नैव स्यादिति ।

(५)—नामोल्लेखनतिथेस्त्रिभ्यो वर्षेभ्यः पूर्वं कस्या अपि राजाङ्गीकृत-संस्कृतसमितेरुपाधिपरीक्षामुत्तीर्णः स्यादित्यपि ज्ञेयम् ।

अत्र किमपि प्रष्टव्यं स्यात्तदा, तथा कार्य्यव्यग्रतादिना कन्भोकेशनकार्य्यसम्पादकैः सह पत्रादिव्यवहारेऽसामर्थ्ये सति निम्नसंकेते यदि पत्रव्यवहारः कृतः स्यादितः समुचितं साहाय्यमवश्यं दीयेत । श्रीमतां विधेयः श्रीगोपालशास्त्री C/o व्यवस्थापक-सूर्योदय जगत्गंज, काशी ।

वर्णनं मन्वन्तरवर्णनमिति यावत्, यतः सृष्टिशृङ्खलायाः सभ्यताविभागानाञ्च वृत्तान्तो लभ्येत, इत्थमेव ऋषीणां राज्ञाञ्च वंशजाः सन्ततयः प्रजातन्तवश्च वर्ण्यन्ते। एतत्पञ्चलक्षणयुक्तमेव पुराणमभिधीयते। प्रत्येकमहापुराण-पुराणोपपुराणौपपुराणादिकेऽस्य लक्षणपञ्चकस्य न्यूनाधिक्यतः समावेशोऽवश्यं सम्भवेत्। तत्रैतावानेव भेदो यत् कुत्रचित् पुराणे पञ्चविषयाणामेषां कस्यापि वर्णनमाधिक्येन कस्यचिद्विषयस्य संक्षेपतः प्राप्यते। द्वितीयोऽप्ययं भेदो यत्, क्वचित् पुराणे पञ्चस्वेतेषु विषयेषु कस्यचिदेकस्य विषयस्य वर्णनं सातिशयमधिकायते तत्र तस्यैव च प्राधान्यमुपजायते, यथाऽस्मिन् मार्कण्डेयपुराणे मन्वन्तरवर्णनस्यैव प्राधान्यं वर्त्तते। पुराणेतिहासयोस्तृतीयभेदोऽयमास्ते—यत्र मृत्युलोकस्य लौकिकेतिहासोऽधिको भवेत्, स इतिहास आख्यायते, यत्र च ऐहिकामुष्मिकवर्णनं समं सम्पद्यते तत् पुराणमाचक्षते। तथा हि, महाभारते कौरवपाण्डवादीनां लौकिकेतिहासप्राचुर्यात् रामायणे च श्रीरामचरितलौकिकेतिहासबाहुल्याद् द्वावेव महाभारतरामायणौ इतिहासौ भण्येते, द्वितीयतः-श्रीदेवीभागवत-श्रीविष्णुभागवत-श्रीमार्कण्डेयपुराणादिषु सर्वविषयाणां साम्यसद्भावात्, लौकिकेतिहासानामाधिक्याभावाद् वा एतानि पुराणानि प्रोच्यन्ते। चतुर्विधं सृष्टिप्रकरणम्, यद्वर्णनं पूर्वमपि बहुवारमायातम्। यथा—प्राकृतसृष्टिः, ब्राह्मी सृष्टिः, मानसी सृष्टिः, वैजी सृष्टिश्च। आसामपि सम्मिलितं वर्णनं पुराणेषूपलभ्यते। किन्तु कुत्रापि पुराणे एतच्चतुर्विधसृष्टिषु कस्याश्चित् सृष्टेर्वैशिष्ट्यं प्रतिपादितम्। द्वितीयतः सृष्टिप्रकरणविषये कस्मिंश्चित् पुराणे मन्वन्तरादिविचारतः सृष्टिलीलाया अधिकाधिकं विततवर्णनं विहितम्। कस्मिंश्चन दैव्या मानव्या वा सृष्टेर्व्यासतो वर्णनमकारि। इत्थमेव सर्गप्रतिसर्गयोर्वर्णने मतभेद इव प्रतीयते। किं बहुना, कुत्रचित् पुराणे एकस्य विषयस्याधिक्यमन्येषां न्यूनत्वमधिगम्यते। तस्मात् सर्वेषां बहूनां वा पुराणानामध्ययनं विना पुराणानामाध्यात्मिकरहस्यं नावगन्तुं शक्येत न वा तद्बोधविधानस्य परिपाटी परिचीयेत। वंशवंश्यानुचरितवर्णनविषयेऽपि बहूनि व्रतव्यानि सन्ति, इतिहासेषु प्रायशो लौकिकवंशवर्णनमधिकमुपजायते पुराणेषु च देववंशवर्णनं वितन्यते। किञ्च त्रिकालदर्शिनां पूज्यपादमहर्षीणां योगदृष्टिसमक्षे मठाकाशमहाकाशयोरिव स्थूलो मृत्युलोकः सूक्ष्मो दैवलोकश्च समानमेवाक्षिगोचरतामापद्यते तदुभयदर्शने न तेषां काऽपि बाधा जायते। अतो वंशवर्णने दैवी सृष्टिर्लौकिकी च सृष्टिः, दैवो वंशो लौकिकश्च वंशः उभये सम्मिलिते वर्ण्येते। यथा—सूर्यवंशस्य सूर्यादेरुत्पत्तिर्या मन्यते स्म सा दैवी वर्णना,

या च दशरथादेः सकाशात् सूर्यवंशस्य प्रभवोऽङ्गीकृतः तल्लौकिकवर्णनमवगन्तव्यम्। इत्थं दैवीं मानुषीञ्च वंशपरम्परां सम्मेल्यावबोधनान्न पुराणपाठकानां पुराणेषु भ्रान्तिरुत्पद्यते, सम्यक् चैतद्रहस्यावधारणादेव ऐहलौकिका ऐतिहासिका अपि जना न विपथगामिनो भवेयुः। वंशवर्णनं वंशानुचरितञ्चावगन्तुं पुराणपाठकैरेतन्निश्चितं प्रणिधेयम्, यत्, पुराणलेखनकाले पूज्यपाद-त्रिकालदर्शि-महर्षयो योगयुक्तसमाधिदृष्ट्या नानामन्वन्तरकल्पान्तरीया गाथा उपलेभिरे, यदा ते स्वरूपावस्थानाद् व्युत्थानदशामासवन्तस्तदा तत्र सविकल्पसमाधौ विचारानुगतावस्थायां कल्पकल्पान्तरोपयुक्तं वंशानुचरितं गाथारूपेण तेषामन्तःकरणपटले समुपतिष्ठते स्म। तस्मादेता गाथा न कपोलकल्पिता नाहोऽखिललौकिकरीत्योपलब्धा आसते। मन्वन्तरकल्पादीनां वर्षसङ्ख्या बहुवारं व्याहृता। प्रवर्त्तमानवंशानुचरितमतिदुर्ज्ञेयैर्धर्मसिद्धान्ततत्त्वैर्मधुरैर्वर्णाश्रमशृङ्खलारहस्यैश्च प्रपूर्यते स्म। ऋषीणां दैवी शक्तिः, क्षत्रियनरपतेः क्षात्रम्, पित्रोः स्नेहसुलभो व्यवहारः, पुत्रराजकुमारस्य क्षत्रियोचितवीरतादिगुणगणैः सममेव इन्द्रियसंयमब्रह्मचर्ययोरलौकिकत्वम्, स्त्रीणां सतीत्वम्, विशेषतः क्षत्रियस्त्रीसतीत्वमर्यादायाः समुज्ज्वलमुदाहरणम्, वर्णाश्रममर्यादायाः पालनम्, पित्रोर्भक्तिः, दैवे जगति निश्चलो विश्वासः, इत्यादयोऽस्यां गाथायामाविरभवन्। राजकुमारस्य लोकोत्तरं ब्रह्मचर्यमपि एतद्गाथामहत्त्वप्रतिपादकमास्ते। पितामहस्य भीष्मादेर्ब्रह्मचर्यं सहेतुकमासीत्, राजकुमारस्य तु ब्रह्मचर्यं व्रतमूलकमवर्तिष्ट, तस्मादत्र विशेषतः स्वारस्यम्। अमुष्यां गाथायाञ्च प्राचीनराजवंशानाम्, राज्ञां राजमहिषीणां राजकुमाराणाञ्च मिथो मर्यादायुक्तसम्बन्धस्यापि सम्यग् दिग्दर्शनमस्ति। राजपुरोहितानाञ्च धर्मसम्बन्धे व्रतबन्धे च कीदृगधिकारः पुराऽऽसीदस्यापि दिग्दर्शनमकारि। गृहस्थाश्रमे वर्त्तमानानां गृहमेधिनां निःसन्तानत्वे ब्रह्मचर्यधारणं नैव सदाचारकोटिमारोहति, तत्त्वेकविधं पापमास्ते। यतो गृहस्थानां कृते वर्णाश्रमशृङ्खलासंरक्षणं पितृसंवद्धनस्य च कार्यक्षेत्रपरिपालनमेव पुण्यं कर्म विद्यते। अस्यापि दिग्दर्शनमत्रास्ति। एतदपि स्तोकतोऽत्र विन्यस्तम्, यत् ब्रह्मचर्यस्य सर्वप्रधानत्वेऽपि नेदं क्रीडावत् सुगममास्ते ॥ १–३० ॥

षड्विंशोत्तरशततमाध्याये गाथावैचित्र्यसमाधानम्।

इयं वंशानुक्रमवर्णनस्य गाथा मृत्युलोकीयस्य कस्यचित् कल्पान्तरीयस्य वर्त्तते। अत्र यद्देवनाऽऽविर्भावो दैवसाहाय्यासादनम्, अन्यलोकेन सह मनुष्यलोकस्य सम्बन्धस्थापनमित्याद्यलौकिकवृत्तं साम्प्रतमसम्भवं प्रतीयते,

तत्समाधानमेतदेवास्ते यत्, प्रथमन्तु एकयुगाद्युगान्तरीयशक्तौ महदन्तरमीक्ष्यते पुनश्चैकमन्वन्तरादन्यस्मिन्मन्वन्तरे जीवानां शक्तौ अधिकारे च विपुलः प्रभेदः प्रजायते, कल्पकल्पान्तरस्य तु कथैव का। तस्मादत्र मनोरमाया गाथाया अलौकिकत्वे नैव संशयितव्यम् ॥ ४०-४७ ॥

ऊनत्रिंशदुत्तरशततमाध्याये 'राज्याभिषिक्तभूपतीनां भोगे नैवासक्तिर्विधेया' इति प्रतिपादयति ।

राजकुमारावस्थायां यौवनसुलभयोः चाञ्चल्यभोगसंस्कारयोः सद्भावाद् राजवंशप्रसूतो जनो भोगपरायणो भवितुमर्हति। किन्तु यदा राजा राज्यसिंहासनमधिरोहति राज्याभिषेकयज्ञेन च तच्छरीरे देवपीठं प्रतिष्ठाप्यते तदा स दैवराज्यस्य साक्षात् प्रतिनिधिर्निर्मीयते। तदा तस्य भोगपरायणत्वे पापमुपजायते, भोगाद् विरस्य धर्मसंस्थापनं पुत्रवत् प्रजापालनमेव च तस्यैकमात्रं जीवनलक्ष्यमुचितं भवेत्। आर्यजाते राजधर्मस्यैष एव बीजमन्त्रः। तस्मादस्मिन् स्थलेऽस्यां गाथायामार्यराजमहिष्या भोगान्निवृत्तये राजाऽऽदिष्टः ॥ २७-३४ ॥

एकत्रिंशदुत्तरशततमाध्याये नागलोकस्य कथावैलक्षण्ये संशयापनोदनम् ।

अस्यां गाथायां नागलोकवासिनां जीवानां यदलौकिकत्वमवलोक्यते, नात्र सन्देहसन्दोहैर्विचलितव्यम्। एतत्तु लौकिक इतिहासोऽपि प्रतिपादयति यत् कतिविधा जीवश्रेण्यः कियन्तो महाशक्तिधारिणो नानारूपशालिनो जीवाश्चास्मिन् मृत्युलोके पुरा लोचनगोचरतामापद्यन्त, न त्विदानीमवलोक्यन्ते। सृष्टावन्यान्यपि कतिचिद्विधानि परिवर्त्तनानि लौकिकेतिहासयुगेऽपि दृश्यन्ते। लक्षलक्षाधिकवर्षात्मकेषु मन्वन्तरेषु कोटिकोटिवर्षात्मकेषु कल्पेषु च सर्पादियोनिजातानां रूपशक्त्यधिकारगोचरमेतादृग्वैचित्र्यपूर्णं वर्णनं नास्त्यसम्भवम्। अस्यां मधुरगम्भीरगाथायां पितामह्या मातापित्रोः राजधर्मपालकस्य राजपुत्रस्य स्वस्वानुरूपधर्ममर्यादापालनेतिहासो नितरां चमत्कृतिं जनयते। प्रतिमन्वन्तरमेकब्रह्माण्डीयसृष्टेः सभ्यता अनुशासनपद्धतिश्च परिवर्त्तते। स्थूलोऽयं मृत्युलोको दैवजगदायत्त एव सुरक्ष्यते सञ्चाल्यते च। तस्मात् प्रतिमन्वन्तरमिन्द्रमन्वादिदेवपरिवर्त्तनेन सह ब्रह्माण्डस्य दैवी शृङ्खला परिवर्त्तते, तत्परिवर्त्तनेनैव सार्द्धञ्च सर्वश्रेणीयोन्नतजीवमात्रस्य शक्तौ सभ्यतायाश्च विनिमयो बोभवीति, यथाऽस्मिन् मृत्युलोके परिवर्त्तिते राजानुशासने तत्सममेव मनुष्यसभ्यता दशान्तरमुपैति। ततो विज्ञा वदन्ति—'राजा कालस्य कारणम्' इति। एवं हि दैवे जगति यदा एकस्मिन् मनौ ब्रह्मीभूतेऽन्यो

मनुस्तत्पदमधिकृत्य कालमनुशास्ति तदाऽखिलब्रह्माण्डस्य सभ्यतायां नितान्तं विनियमो जायते। सर्वस्मिन् पुराणशास्त्रे यन्नानाविधवैचित्र्यपूर्णकथाकदम्बमुपलभ्यते तत्पाठाद् यश्च नैकविधसन्देहसन्दोहः समुत्पद्यते; एतादृग्वर्णनवैचित्र्यस्य यावन्तो दार्शनिकहेतवो भवेयुस्तत्र नानामन्वन्तरीयविभिन्नशृंखलाशकृत्योरनुसारतः सृष्टिवैचित्र्यं सभ्यतावैचित्र्यञ्च प्रधानं कारणं विद्यते। मार्कण्डेयपुराणे मन्वन्तरविमर्शप्रसङ्गे विभिन्नाया दैव्याः शृंखलायाः सूत्ररूपतो दिग्दर्शनमकारि। तदस्मिन् पुराणशास्त्रे वर्णाश्रमं मन्यमानाया आर्यजातेर्लोकोत्तरसभ्यताया गाथारूपतो मौलिकसिद्धान्तसमूहो यथास्थानं सम्यग् दर्शितः। धर्मभावतो धर्मः सर्वव्यापकः सर्वजीवहितकरश्च वर्त्तते। न केवलं स जीवहितकरः किन्त्वाब्रह्माण्डपर्यन्तं किञ्च प्रत्येकं परमाणु यावद्धर्मस्य धारिका शक्तिः सर्वेषां मङ्गलं विदधानाऽऽस्ते। रजोगुणात्मिकाया आकर्षणशक्तेः तमोमूलिकाया विकर्षणशक्तेश्च समन्वयाज्जायमानेन धर्मेणैव ब्रह्माण्डस्य ग्रहोपग्रहाः स्वमर्यादाः परिपालयन्ति। एतद्विज्ञानानुसारं पाषाणे पाषाणत्वम्, अग्नावग्नित्वमित्यादिरूपतः क्षुद्रान् महतो वा जड़पदार्थान् धारयन् धर्म एव तेषामस्तित्वमभिरक्षति। तथा हि, यदि पाषाणस्य धर्मशक्तिर्नश्येत् तदा रजोमूलिकाया आकर्षणशक्तेर्नाशात्तमोमूलिकाया विकर्षणशक्तेः प्राबल्याच्च पाषाणपरमाणुपुञ्जा विकृष्टा मृदो भविष्यन्ति पाषाणस्यास्तित्वं च प्रणङ्क्ष्यति। एतामेव सर्वव्यापिकां दुर्निवारां दैवीं व्यवस्थामनुसृत्य प्रतिजीवपिण्डं प्रमादजड़तानिदानं तमोगुणः क्रियामोक्षेच्छामूलको रजोगुणश्च यावत समन्वेष्यतः, तावदेव सत्त्वगुण उदेष्यति तावदेव च समुन्नतजीवेषु धृति-क्षमा-दमाऽस्तेय-न्यायप्रेम-सत्यादिधर्मवृत्तीनामधिकारः समेधिष्यते। तच्च जीवपिण्डजातं धर्मजगत्यामग्रेसरिष्यति। एतदेव मनुष्यस्य मनुष्यत्वमास्ते। अग्रे प्रवर्द्धमाना सैव धर्मशक्तिः पुरुषे यज्ञधर्मात्मना नार्यां तपोधर्मरूपेण चोभयोः स्वतन्त्रं स्वधर्मं संरक्ष्य द्वयोः स्वस्वाधिकारानुरूपमभ्युदयं निःश्रेयसञ्चाभिलक्ष्य द्वावेवाग्रेसारयति। सैव धर्मशक्तिः पुनराध्यात्मिकोन्नतिशीलां दैवजगत्सहायिकां शुद्धबुद्धिविवेकशालिनीं वर्णाश्रमशृङ्खलासञ्चालिनीं मृत्युलोकप्रभवामार्यजातिं नश्वरेऽपि संसारे चिरं जीवयति। तस्मादेव वर्णाश्रमिण्या आर्यजातेराचारविचारौ पृथिव्या अन्यसर्वजातिभ्योऽपूर्वौ विलक्षणौ च वर्त्तेते। चिरजीवित्वादाध्यात्मोन्नतिशीलत्वाच्च मनुष्यजातिसभ्यताविस्तारस्य यावान् ज्ञानराशिरास्ते सर्वस्यास्तस्या ज्ञानपद्धतेरादिगुरुर्जगद्गुरुरियमेव वर्णाश्रमधर्मावलम्बिनी आर्यजातिर्विद्यते। अस्मिन् विषये जगति न कस्यापि विदुषो मतभेदो भवितुमर्हति।

आर्यजातेर्विशेषधर्मस्य तद्विशिष्टसभ्यतायाश्च सर्वे महान्तो मौलिकसिद्धान्ता अस्मिन् पुराणशास्त्रे दिग्दर्शिताः। एकतो नारीजातौ अनुपमत्यागस्य तपोमूलकसतीत्वधर्मस्य च पूर्णता सङ्क्षेपतो व्याहृता, द्वितीयतः सामान्यतः स्त्रीणामात्मज्ञानाधिकारासत्त्वेऽपि त्रिलोकपावनपातिव्रत्यधर्मपालनेन सह नारीजातौ आत्मज्ञानस्य पूर्णता कथं प्रभवेत्, अस्यापि दिग्दर्शनमत्राऽकारि। आर्यजातेरयमेको विशेषधर्मः। वर्णमर्यादायाः पराकाष्ठा, वर्णविज्ञानस्याप्रतिममुदाहरणम्, वर्णधर्मः कथङ्कारमार्यजातेः प्राणरूपो विद्यते, इत्यादि सर्वमेवाऽस्मिन् पुराणेऽनेकस्थलेषु सम्यग् दर्शितम्। आश्रममर्यादाया विशेषतः सर्वाश्रमसहायकस्य गृहस्थाश्रमस्य वैज्ञानिककथाकदम्बैरनुकरणीयजीवनचरितैरितिहासैश्च महापुराणमेतन्नितान्तं मधुरं मनोहरञ्च व्यधायि। एकतः परलोकवादस्य दैवजागतिकसिद्धान्तवादस्य तच्छृङ्खलायाश्च रहस्यानि दिग्दर्शयत् द्वितीयतः सप्तशतीगीतात्मिकां चण्डीमाविर्भावयत्, महापुराणमिदं न केवलं जगन्मान्यमेवाऽभूत्, किन्तु सर्वेषां जीवानां सातिशयं सहायकमप्यभवत्। रजोवीर्यशुद्धिरेव वर्णाश्रमधर्ममूलम्। रजोवीर्यशुद्ध्यैवाऽनादिकालत इयमार्यजातिः स्वीयां लोकोत्तरसभ्यतामपरिवर्त्तनीयमात्मीयमाध्यात्मिकलक्ष्यञ्च रक्षन्ती चिरजीविनी वर्त्तते। एतद्रजोवीर्यशुद्धिविज्ञानस्य प्रतिष्ठां महापुराणमेतत् सम्यक् प्रतिपादयति। शुद्ध्यशुद्धिधारणा स्पर्शास्पर्शविवेचना चार्यजातेर्विशेषत्वरक्षाया मुख्यमवलम्बनमास्ते। जातेरस्या आचारविचारशुद्धिर्जीवनमस्ति। किञ्च, त्रिविधान्येतान्याध्यात्माधिदैवाधिभूतलक्ष्याण्यभिलक्ष्यैव त्रिविधशुद्धये सदाचरणं सनातनधर्मिणां मुख्यमुद्देश्यमगन्तव्यम्। सर्वेषाममीषां वर्णाश्रममौलिकसिद्धान्तानां बीजमत्र पुराणे प्रतितिष्ठति। यथाऽनार्यजातेर्जीवनमैन्द्रियविषयभोगमूलकं बोभवीति तथैवार्यजातेर्जीवनं पारलौकिकोन्मुखं धर्ममोक्षलक्ष्यमूलकञ्च जायते। अपि चार्यजातेर्जीवनस्रोतः प्रवृत्तिगतिनिरोधात् क्रमशो निवृत्तिं शान्तिञ्चाभिलक्ष्य प्रवहते, एतद्दिग्दर्शनमस्मिन् महापुराणे विशदं व्यधायि। तपःस्वाध्यायनिरताया ब्राह्मणजातेस्तु कथैव का, अमितैश्वर्यशक्तिप्रभुत्वाधिकारशालिनोऽप्यार्यजातीया राजानः कीदृशस्त्यागिनो धार्मिकाः प्रजावत्सला अध्यात्मलक्ष्यनिर्भरास्तपोदानपरोपकारमूर्त्तयोऽभूवन्, राजैश्वर्यमगण्यं मन्यमानाः केवलं धर्मपालननिमित्तमेव प्राणान् बिभराम्बभूविरे। एषामुज्ज्वलैरुदाहरणैर्गाथामयैरेतन्महापुराणं परिपूर्यते। विज्ञमात्रमेवैतान् सर्वान् विषयान् विलोक्य आर्यजातेः प्राचीनां त्रिलोकपाविनीं सभ्यतां परिचेतुं शक्यति यथासम्भवमेतत् पवित्रचरित्रमनुकृत्य कृतकृत्यतामेष्यति च ॥ १-५१ ॥

द्वित्रिंशदुत्तरशततमाध्याये कर्मविज्ञानवर्णनम् ।

कर्मणैव मनुष्यो निष्कामभावमुपगन्तुमर्हति, न तु कर्मत्यागेन । एष सिद्धान्तः सर्वोपनिषत्सारभूतायां श्रीमद्भगवद्गीतायां पूर्णावतारेण श्रीमता भगवता कृष्णचन्द्रेण पूर्णतया प्रतिपादितः । कर्ममीमांसादर्शनमेतत् सिद्धान्तयति, यत् प्रकृतेः स्पन्दनं कर्म प्रोच्यते । यत्र द्वैतप्रपञ्चो यत्र वा सृष्टिरास्ते तत्र सर्वत्रैव जगदम्बाया ब्रह्मप्रकृतेर्विलासः । तस्मात् प्रकृतिराज्याद्बहिः स्वस्वरूपातिरिक्तं न किमपि भवेत् । सृष्टिं द्वैतं वा यावत् सर्वं तत् प्राकृतिकं प्रणिधेयम् । यत्र प्रकृतिरस्ति तत्र त्रयो गुणाः सन्ति, यतो गुणत्रयमेव प्रकृतेः स्वरूपम् । यत्र त्रयो गुणा भवन्ति तत्र त्रिगुणविलासजन्यं स्पन्दनमवश्यं सम्भवेत् । तस्मात् क्रियासद्भावोपि निश्चितः । अतो जड़चेतनात्मके सर्वत्रैव निरन्तरं नित्यरूपेण शश्वत् कर्म बोभूयते । तस्माद्धेतोर्मानवे उन्मेषण-निमेषण-गमन-भ्रमण-श्वास-प्रश्वासादयः शारीरिकक्रिया नानावैषयिकसदसच्चिन्तात्मिका मानसिकक्रियाश्च निसर्गतः सदा बोभवन्ति । एतावता स्त्री पुरुषो वा स्यात्, ज्ञानी अज्ञानी, मनुष्यो देवता वा भवेत् सर्वत्रैव कर्मसम्बोभूतिरवश्यं स्यात् । तदभावो नितान्तमसम्भवः । द्वितीयतः कर्मत्यागमन्तरेण नैव चिरशान्तिरासाद्यते न वा मुक्तिर्भवितुमर्हति । अपि च कर्माभावो यथाऽसम्भवस्तथैव कर्मत्यागोऽप्यसम्भवः । यदा कर्मत्यागो न भवितुं शक्नोति तदा कर्म त्यक्त्वा कथं मुक्तः सम्भवेत् । एतामेव गूढ़ामतिजटिलामत्यन्तचमत्कृतां शङ्कां श्रीमद्भगवद्गीता समादधात् । तथा हि, यस्य यादृगधिकारो यादृशी प्रकृतिः प्रवृत्तिश्च भवेत्, साधकस्तदनुकूलं कर्म कुर्वन्नूनमवतिष्ठेत । किन्तु तत् कर्म फलेच्छारहितः कर्तव्यबुद्ध्या कुर्यात् । तदैव तत्कर्मविधानमकर्मवद् भवेत् । एतदेव कर्मविधिना निष्कामकर्मानुष्ठानमुच्यते । एनमत्यन्तगहनविषयमित्थमपि बोद्धव्यम्–कर्मैव व्यष्टेः समष्टेः सृष्टेर्मूलम् । कर्मण्येव सर्वं निर्बिभर्ति । पिण्डब्रह्माण्डयोः सृष्टिस्थितिलयाः कर्मणैव सम्पद्यन्ते । द्वितीयतो बीजाद् वृक्षो वृक्षाच्च बीजं बोभूयमानमनाद्यन्तकर्मस्रोतांसि प्रवाहयति । कर्मप्रवाहोऽयं न विरम्येत न वा मुच्येत, किन्तु दार्शनिकदृष्ट्या एतत् सिध्यति यत्, संस्काररूपेणैकवारं कर्मणो बीजत्वप्राप्तेः द्वितीयतो वृक्षरूपेण भोगोत्पादनस्य चास्यावस्थाद्वयस्योत्पत्तेर्निदानं वासनाजालमेवास्ते । कर्म किल जड़राज्यात्मके पाषाणादौ चेतनराज्यमये मानवादौ च नियमितं बोभवीति । किन्तु पाषाणादौ वासनाजालसद्भावाभावात् तस्य कर्मणः संस्कारस्तत्र नैव संगृह्यते, मनुष्यान्तःकरणे तु वासनाजालं सदा सन्तिष्ठते, ततो मानवः सर्वेषां

शारीरिकमानसिकबौद्धिक-कर्मणां बीजभूतं संस्कारं स्वचित्ते वासनाजालेना- दत्ते । तदेव वासनाजालं संगृहीतेन संस्कारबीजेन देशकालयोः सम्यक् सहयोगित्वे वृक्षरूपं कर्म जनयतेतराम् । इत्थं वासनाजालविजड़ितमन्तः- करणं संस्कारात् कर्म कर्मतश्च पुनः संस्कारमुत्पादयत् सदा कर्मप्रवाहे पत- मानमवतिष्ठते । यदि वासनाजालमुच्छिद्येत तदा कर्म संस्कारसंग्रहाद्विर- मेत् यदा च कर्मसंस्कार एव जीवान्तःकरणे नैवाऽवतिष्ठत तदा जीवः स्वत एव कर्मबन्धनाद्विमुच्येत । अतिगहनविषयमेतमवगन्तुं किञ्चिदन्यप्रकारेणापि प्रोच्यते—मीमांसाशास्त्रेण अनाद्यन्ताकाशस्त्रिधा व्यभाजि, एकश्चित्ताकाशो द्वितीयश्चिदाकाशस्तृतीयो महाकाशश्च । मानवानामन्तःकरणाकाशः चित्ता- काशः प्रोच्यते, ब्रह्माण्डस्य समष्ट्यन्तःकरणाकाशश्चिदाकाश आम्नायते, अन- न्तकोटिब्रह्माण्डानामनाद्यन्ताकाशो महाकाश आख्यायते । इदमाकाशत्रयं कर्मसंस्कारान् संग्रहीतुं धान्यसंग्रहस्थानं खलमिव प्रणिधेयम् । कर्म नैव नश्यति, कर्मबीजमत्राकाशत्रये कथञ्चिन्नूनमवतिष्ठते । तस्मादेव सृष्टेरना- द्यन्तप्रवाहो निरन्तरं प्रवहते । केवलेन निष्कामकर्मयोगेन वासनाजालमु च्छिद्य गमनागमनचक्रचङ्क्रमणावर्त्तात् पृथग्भवन् साधकः कर्मबन्धनात् त्रायेत । अत्र शङ्का भवितुमर्हति यत्, कर्म यदा न नश्यति कर्मबीजमपि यदा कुत्राप्याकाशेऽवश्यमवतिष्ठते तदा कथं मुक्तिः सम्भवेत् । एवंविधानां शङ्का- नामेतदेव समाधानं यत्, यदा वासनाजालमेव संस्काररूपं कर्मबीजं संगृह्णाति सन्धारयति च तर्हि जीवन्मुक्तो महापुरुषो यदा साङ्ख्यकर्मयोगाभ्यां शस्त्राभ्यां वासनाजालमुच्छिनत्ति तदा तस्य जीवकेन्द्रस्य चित्ताकाशस्तत्कृतकर्मबीज- संस्कारान् संग्रहीतुं नैव क्षमते । ततस्तज्जीवन्मुक्तान्तःकरणं कर्मबन्धनात् परिरक्ष्यते । द्वितीयतः प्रकृतेर्नियमस्यापि भङ्गो न जायते । एकतो यथा वासनाजाले छिन्ने जीवन्मुक्तान्तःकरणं योगयुक्तं सद्बन्धनविरहितमुपजायते, द्वितीयतस्तथैव कृतेऽपि कर्मणि निष्कामभावतः कर्म प्रकुर्वाणोऽसौ कर्मणैव निष्कामकर्मी जायते । तदीयं प्राक्तनमर्वाचीनं वा कर्म न तद्बन्धनाय क्षमते । यतस्तद्बन्धनाय यद्वासनामयं जालमासीत् तन्नैवाऽवर्त्तिष्ट । किन्तु प्रकृतेर्मा- तुरनिवार्यनियमो वर्त्तते यद्बीजाद् वृक्षो वृक्षाद् बीजं स्यात्; कर्मणः संस्कारः संस्काराच्च कर्म वा बोभूयते, इत्थं कर्मप्रवाहः सृष्टिप्रवाहश्च सदाऽवतिष्ठेत, एष प्राकृतिकनियमोऽपि नोच्छिद्यते, यतो जीवन्मुक्तमहापुरुषस्य कर्मराशिर्यदा तदन्तःकरणे बीजमाधातुं नेष्टे तदीयं चित्ताकाशश्च विजहाति तदा तत् सर्वं बीजजातं खलायमानमन्यं चिदाकाशमुपैति, तत्र स्थितश्च बीजजातं पुनर्देश-

कालानुकूल्यमासाद्य प्ररोहते । सृष्टेः कर्मणश्च नित्यप्रवाहो निरन्तरं प्रवहत्येव । केवलं यस्य जीवन्मुक्तस्यान्तःकरणमुच्छिन्नवासनाजालमुपजायते केवलमासावेव कर्मसंस्कारपशादात्मानमुन्मोच्य पलायते । एषा एव कर्मराज्याज्जीवानां विरतिर्वर्ण्यते, अयमेवाऽविद्यावन्धनाज्जीवानां मुक्तिराम्नायते, इयमेव गमनागमनचक्रवागुरोपरतिर्जीवानाम्, एतदेव मुक्तिरहस्यम्, इदमेव निष्कामकर्माचरणफलमिति ॥ ६-१६ ॥

नरिष्यन्तनृपतेर्मृत्युघटनायां शंकासमाधानाय जीवन्मुक्तिरहस्यप्रतिपादनम् ।

कर्मयोगी ब्राह्मणो नृपः, सन्यासी गृहस्थो वा भवेत्, तस्य नैसर्गिको मृत्युरकालमृत्युर्वा स्यात्, स जीवितावस्थायां मुक्तः शरीरान्ते च मुक्तेरधिकारी वर्त्तते, अत्र सन्देहो नास्ति । अतिविचित्रा कर्मगतिः । पूर्वकर्मानुसारत आयुरन्तो मृत्युसंयोगश्च संघटेते । ततोऽतिपुण्यशालिनः कर्मयोगिनो राज्ञो नरिष्यन्तस्य मृत्युघटनायां न काश्चित् शङ्कां कर्त्तुमवसरो विद्यते ॥ २८-३३ ॥

त्रिंत्रिंशदुत्तरशततमाध्याये मातृगर्भे बहुवर्षवासविज्ञानविवेचनम् ।

प्रथमं तु सामान्यक्रमतोऽधिकदिनानि यावद् गर्भे सन्ततेर्निवासस्य असाधारणरीत्या गर्भाद्वहिर्निःसरणादेश्च नैकान्युदाहरणानि लौकिकेतिहासेष्वपि मिलन्ति । द्वितीयतः पृथक् पृथक् मन्वन्तरे सृष्टिशृङ्खलायां भेदसद्भावात् पुरुषशक्तौ स्त्रीशक्तौ च भेद उपजायते । एतन्निखिलकारणकलपाद् गर्भस्थस्य शिशोरधिकदिनानि यावत् गर्भवासे न कश्चित् संशयावसरः ॥ १-६ ॥

चतुस्त्रिंशदुत्तरशततमाध्याये नरिष्यन्तनृपतेर्जीवनवृत्तान्तमभिलक्ष्य वर्णाश्रमधर्मदिग्दर्शनम् ।

कर्मयोगित्वाज्जीवन्मुक्तत्वाच्च पत्युः शरीरान्तदशाया अमङ्गलमयीं घटनां विवेचयितुमेव कश्चिदवसरो नास्ति । किन्त्वार्यराजमहिष्यो यदा राजवैभवं विहाय वानप्रस्थाश्रमे तपश्चर्यापुरस्सरं निरताः सन्तिष्ठन्ते तत्कालीना गाथेयं सातिशयं हृदयं गृह्णाति, सनातनधर्मसिद्धान्तानुयोगाद् ब्राह्मणानां कृते ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसन्न्यासनामानश्चत्वार आश्रमा विहिताः, क्षत्रियाणां निमित्तमाश्रमत्रयं तेषां सन्न्यासाधिकाराभावात्, वैश्यानामाश्रमद्वयं शूद्राणान्तु केवलं गृहस्थाश्रम एव विधीयते स्म । एतामेवाध्यात्मलक्ष्योपेतामाश्रमशृङ्खलामनुसृत्य प्राचीनक्षत्रियराजन्यवर्ग आत्मज्ञोऽमितैश्वर्यशक्तिसम्पन्नश्चापि अन्ते निजराजवैभवमुत्सृज्य वानप्रस्थाश्रमस्थितस्तपश्चर्यामकार्षीत् । अस्योदाहरणं

समालोचना ।

श्रीप्रमाणनयतत्त्वालोकः ।

अयं सूत्रबद्धो विशिष्टो जैनदर्शनग्रन्थः । अत्र षड्दर्शनप्रौढपण्डित-श्रीमद्रामगोपालाचार्यकृता बालबोधिनी टिप्पणी नितान्तं सरला सातिशयं प्राञ्जलभाषयोपनिबद्धा नितरां विभ्राजते । ग्रन्थोऽयं सर्वैरादरणीय आदेयश्च विद्यते । मूल्यमस्य चतुर्दशाणकमितम् । प्राप्तिस्थानम् "मन्त्री श्रीविजयधर्म-सूरिग्रन्थमाला" लूणमंडी, उज्जैन (मालवा)

मातृमहिमा ।

पुस्तिकेयं हिन्दीभाषापद्यमयी मातृभक्तिप्रकाशिनी वर्त्तते । रचयिताऽस्याः साहित्यशास्त्री पण्डित-श्रीसरयूप्रसादपाण्डेयो 'द्विजेन्द्रः'। अत्र मनोरमाणि पञ्चाशत्पद्यान्यासते । मूल्यमस्यैक आणकः । मैनेजर-कविताशिक्षालय औरंगाबाद, काशी, इति संकेतेन लभ्यते पुस्तिकेयम् ।

द्रव्यगुणतत्त्वम् ।

वङ्गभाषानुवादसहितं वङ्गाक्षरैः मुद्रितं पुस्तकमिदं सर्वैर्वङ्गभाषाभिज्ञैर्वैद्यैरादेयम् । अत्र द्रव्याणां गुणा विशदं वर्णिताः । श्रीयुतरामशंकरभट्टाचार्येण सङ्कलितमेतत् पुस्तकं तस्मादेव लभ्यते । मूल्यमाणकत्रयम । प्राप्तिस्थानम् श्रीरामशंकर भट्टाचार्य, माटीखाइन, जि० चट्टग्राम ।

श्रीपीयूषपत्रिका ।

अस्या अष्टमसङ्ख्या सम्प्रति मत्समीपे वरीवर्त्ति । अत्र विविधा वैष्णववैभवविधायकाः सरसाः साधवो लेखाः प्रकाश्यन्ते । पत्रिकेयं प्रतिक्षणमभ्युदयाध्वानमधिरोहति । सम्पादकावस्याः पञ्चोलीत्युपाह्वहीरालालशास्त्री, श्रोङ्कारात्मजहरिशंकरशास्त्री च । वार्षिकं मूल्यं रूप्यकत्रयमेव प्रकाशकात् ओंकारात्मजहरिशंकरशास्त्रितः श्रीपीयूषपत्रिकाकार्यालयः नडीयाद गुजरात इतिसंकेतेन लभ्यते पत्रिकेयम् ।

वैशाली ।

हिन्दीभाषामयी सचित्रपत्रिकेयं वैशालीकार्यालय (कमलालय) मुजफ्फरपुरात् प्रतिमासं प्रकाशते । अस्याः सुयोग्यः सम्पादकः श्रीभुवनेश्वर-सिंह–'भुवन' महाशयो विद्यते । अत्रानेकेषां सुलेखकानां विविधविषयविभूषिता गवेषणापूर्णा मनोहरा लेखा लोचनगोचरतामापद्यन्ते । एषा 'वैशाली' सर्वैः प्रेक्षावद्भिरादरणीया, संग्रहणीया च । मूल्यं वार्षिकं रूप्यकत्रयम्, प्रकाशकस्थानात् प्राप्यते च । 'वसन्ताङ्कोऽस्या विशेषाङ्को नितान्तं समीचीनो निःसृतः । मूल्यमस्याङ्कस्याष्टाणकाः ।

द्रव्यगुणादिविवेचनात्मकम् ।

निघण्टुपरिषदध्यक्षस्य खुर्जास्थलक्ष्मणदासायुर्वेदविद्यालयप्रधानाध्यापकस्य साहित्योपाध्याय-पण्डितश्रीनारायणदत्तशर्मण आयुर्वेदाचार्यस्याभिभाषणमिदमास्ते । अत्राभिभाषणे द्रव्यगुणानां विद्वत्ताविलसितं विशदं विवरणं सम्यग् विहितम् । सर्वैः संग्रहणीयमिदम् । स्वागतसमितेः प्रधानमन्त्रितः वीकानेरनगरादेतल्लभ्यते ।

संस्कृतज्ञानां कृते, महत्त्वौकर्याय

सनातनधर्मोपयोगिनो ग्रन्थाः।

[निम्ननिर्दिष्टाः ग्रन्था वैज्ञानिकया युक्त्या सनातनधर्मरहस्यं स्फुटी-कुर्वन्ति। एतेषां विलोकनेन महोपकारो नूनं भावीति तदुपकारार्थं सर्वे निवेद्यन्ते।]

ईशोपनिषद् ॥) केनोपनिषद् ॥) शम्भुगीता १) शक्तिगीता १) संन्यास-गीता १) शास्त्रचन्द्रिका १॥), [illegible]महायज्ञ १) धर्मसुधाकर २) योगदर्शन २) वेदान्तदर्शनचतुःसूत्री ।=) [illegible]गीता ॥।) धीशगीता ॥) सूर्यगीता ॥) विष्णुगीता १) धर्मकर्मदीपिका ॥) कर्ममीमांसादर्शन २ भाग १॥)–२) मन्त्रयोग-संहिता १) हठयोगसंहिता ।॥) धर्मकल्पद्रुमः-अष्टमभागपर्यन्तम्-क्रमशो मूल्यम् २) १॥) २) २) २) १॥) २) २) तुलसीकृत-रामायण १॥) नारि-चन्द्रिका २ भाग १) १॥) सतीचरित्रचन्द्रिका २) श्रीमद्भगवद् [illegible] गीतार्थचन्द्रिकानामक-व्याख्यासहिता २॥) The World's Eternal Religion 3/- मार्कण्डेय-पुराणहिन्दी, रहस्योद्घाटिनीटीकासहित प्रथमभाग १), उपदेशपारिजातः ॥) कल्किपुराणम् १॥) गुरुगीता ।) श्रीरामगीता १॥) कठोपनिषत् शाङ्करभाष्य-सहिता १=) भाष्य ५) श्रीमद्भागवतम् २॥) आश्वलायनगृह्यसूत्र ४) दशकर्म-पद्धतिः (सोलहसंस्कार) २॥) श्राद्धविवेकः १॥) प्रतिष्ठामयूखः ॥) शान्तिमयूख, १) मन्त्रमहोदधिः ३) देवीभागवतम् २॥) महानिर्वाणतन्त्रम् ३) [illegible] २) सांख्यकारिका ॥) चरकसंहिता ४) सुश्रुतसंहिता ४) निघण्टु =) शब्दबोध २) भारत-भारती १) अत्र व्याकरण-काव्यालङ्कार-पुराण ज्यौतिष-न्यायमीमांसा, वेदान्तनाटक-चम्पू कोशेतिहासग्रन्थाः, तथा अन्यानि विविधानि धार्मिक पुस्तकानि हिन्दीसाहित्यपुस्तकानि च मिलन्ति पत्रं लिखित्वा पुस्तकसूची गृह्य-ताम्। पत्रप्रेषण-संकेतः—मैनेजर, निगमागमबुकडिपो, भारतधर्मसिण्डिकेट स्टेशनरोड, बनारस कैण्ट।

Printed by Baldeo Datt Thaker and Published by A. P. Dwivedi
at the Bharat Dharma Press, Benares.